विष्णुर्ब्रह्मा महादेवो गणेशो यमराड् गुहः । कुबेरो विश्वकर्मा च परा प्रकृतिदेवता ॥१७
सुमेरुर्वरुणो वह्निर्वायुश्चैव ध्रुवस्तथा । सोमो रविस्तथा शेषोऽपरा प्रकृतिदेवता ॥१८
अतः सोमपती रुद्रो रविः स्वामी विधिः स्वयम् । शेषस्वामी हरिः साक्षान्नमस्तेभ्यो नमो नमः ॥१९
इति श्रुत्वा तदा विप्रः शिष्यो भूत्वा च तद्गुरोः । तदाज्ञया चतुर्थाङ्गं ज्योतिःशास्त्रं चकार ह ॥२०
वराहसंहिता नाम बृहज्जातकमेव हि । क्षुद्रतन्त्रांस्तथान्यान्वै कृत्वा तत्र स चावसत् ॥२१

## सूत उवाच

वाणीभूषण एवापि शिवभक्तिपरायणः । कृष्णचैतन्यमागम्य वचः प्राह विनम्रधीः ॥२२
विष्णुमाया जगद्धात्री सैका प्रकृतिरुत्कृता । तया जातमिदं विश्वं विश्वाद्देवसमुद्भवः ॥२३
विश्वेदेवस्स पुरुषश्शक्तिजो बहुधाभवत् । ब्रह्मा विष्णुर्हरश्चैव देवाः प्रकृतिसम्भवाः ॥
अतो भगवती पूज्या तर्हि तत्पूजनेन किम् ॥२४
इति श्रुत्वा स यज्ञांशो विहस्याह द्विजोत्तमम् । न वै भगवती श्रेष्ठा जडरूपा गुणात्मिका ॥२५
एका सा प्रकृतिर्माया रचितुर्जगतां क्षमा । पुरुषस्य सहायेन योषितेव नरस्य च ॥२६
देवीभागवते शास्त्रे प्रसिद्धेयं कथा द्विज । कदाचित्प्रकृतिर्देवी स्वेच्छयेदं जगत्खलु ॥२७
निर्मितं जड़भूतं तद्बहुधा बोधितं तया । न चैतन्यमभूद्विप्रा विस्मिता प्रकृतिस्तदा ॥२८
शून्यभूतं च पुरुषं चैतन्यं समतोषयत् । प्रविष्टो भगवान्देवीमायाजनितगोलके ॥२९

---

रूप आठ भागों में विभक्त हैं। विष्णु ब्रह्मा, महादेव, गणेश, यमराज, गुह, कुबेर एवं विश्वकर्मा, परा प्रकृति के देवता हैं। सुमेरु, वरुण, अग्नि, वायु, ध्रुव, सोम, रवि और शेष अपरा प्रकृति के देव हैं। अतः सोमपति रुद्र ही रवि, ब्रह्मा स्वामी, और शेष स्वामी, साक्षात् हरि हैं। उन्हें बार-बार नमस्कार है।

स्वप्नवद्वा स्वयं जातश्चैतन्यमभवज्जगत् । अतः श्रेष्ठः स भगवान्पुरुषो निर्गुणः परः ॥३०
प्रकृत्यां स्वेच्छया जातो लिङ्गरूपस्तदाऽभवत् । पुँल्लिङ्गप्रकृतौ जातः पुँल्लिङ्गोऽयं सनातनः ॥३१
स्त्रील्लिङ्गप्रकृतौ जातः स्त्रील्लिङ्गोऽयं सनातनः । नपुंस्कप्रकृतौ जातः क्लीबरूपः स वै प्रभुः ॥३२
अव्ययप्रकृतौ जातौ निर्गुणोऽयमधोक्षजः । नमस्तस्मै भगवते शून्यरूपाय साक्षिणे ॥३३
इति श्रुत्वा तु तद्वाक्यं शिष्यो भूत्वा स वै द्विजः । त्रिंविंशाब्दे च यज्ञांशे तत्र वासमकारयत् ॥३४
छन्दोग्रन्थं तु वेदाङ्गं स्वनाम्ना तेन निर्मितम् । राधाकृष्णपरं नाम जप्त्वा हर्षमवाप्तवान् ॥३५

## सूत उवाच

धन्वन्तरिर्द्विजो नाम ब्रह्मभक्तिपरायणः । कृष्णचैतन्यमागम्य नत्वा वचनमब्रवीत् ॥३६
भवांस्तु पुरुषः श्रेष्ठो नित्यशुद्धस्सनातनः । जड़भूता च तन्माया समर्थो भगवान्स्वयम् ॥३७
नित्योऽव्यक्तः परः सूक्ष्मस्तस्मात्प्रकृतिरुद्भवः । अतः पूज्यस्स भगवान्प्रकृत्याः पूजनेन किम् ॥३८
इति श्रुत्वा विहस्याह यज्ञांशस्सर्वशास्त्रगः । नायं श्रेष्ठस्य पुरुषो न क्षमः प्रकृतिं विना ॥३९
पुराणे चैव वाराहे प्रसिद्धेयं कथा शुभा । कदाचित्पुरुषो नित्यो नाममात्रः स्वकेच्छया ॥
बभूव बहुधा तत्र यथा प्रेतस्तथा स्वयम् ॥४०
असमर्थो विरचितुं जगन्ति पुरुषः परः । तुष्टाव प्रकृतिं देवीं चिरकालं सनातनीम् ॥४१

---

जगत, उसी समय स्वप्न की भाँति उद्‌बुद्ध होकर चैतन्य हो गया । अतः वही भगवान् श्रेष्ठ है, जो पुरुष, निर्गुण एवं पर है । स्वेच्छया प्रकृति में उत्पन्न होने के नाते वह लिंगरूप हुआ, जिससे पुल्लिग प्रकृति में उत्पन्न होने के कारण सनातन पुल्लिग, स्त्रीलिंग की प्रकृति में उत्पन्न होकर सनातन स्त्रीलिंग, नपुंसक प्रकृति में उत्पन्न होकर नपुंसक रूप कहा गया है । अव्यय प्रकृति में उत्पन्न होकर वह निर्गुण अधोक्षज (इन्द्रियजेता) कहलाता है । इसलिए, उस शून्यरूप, एवं साक्षीभूत भगवान को नमस्कार है । इसे

तदा देवी च तं प्राप्य महत्तत्वं चकार ह । सोऽहङ्कारश्च महतो जातस्तन्मात्रिकास्ततः ॥४२
महाभूतान्यतोऽप्यासंस्तैः सञ्जातमिदं जगत् ॥४३
अतस्सनातनौ चोभौ पुरुषात्प्रकृतिः परा । प्रकृतेः पुरुषश्चैव तस्मात्ताभ्यां नमो नमः ॥४४
इति धन्वन्तरिः श्रुत्वा शिष्यो भूत्वा च तद्गुरोः । तत्रोष्य चैव वेदाङ्गं कल्पवेदं चकार ह ॥
सुश्रुतादपरे चापि शिष्या धन्वन्तरेः स्मृतः ॥४५

## सूत उवाच

जयदेवस्स वै विप्रो बौद्धमार्गपरायणः । कृष्णचैतन्यमागम्य पञ्चविंशवयोवृतम् ॥
नत्वोवाच वचो रम्यं स च श्रेष्ठ उषापतिः ॥४६
यस्य नाभेरभूत्पद्मं ब्रह्मणा सह निर्गतम् । अतस्स ब्रह्मसूर्नाम सामवेदेषु गीयते ॥४७
विश्वो नारायणस्साक्षाद्यस्य केतौ समास्थितः । विश्व केतुरतो नाम न निरुद्धोऽनिरुद्धकः ॥४८
ब्रह्मवेला च तत्पत्नी नित्या चोषा महोत्तमा । स वै लोकहितार्थाय स्वयमर्चावतारकः ॥४९
इति श्रुत्वा विहस्याह यज्ञांशस्तं द्विजोत्तमम् । वेदो नारायणः साक्षात्पूजनीयो नरैः सदा ॥५०
ततः कालस्ततः कर्म ततो धर्मः प्रवर्तते । धर्मात्मकामः समुद्भूतः कामपत्नी रतिः स्वयम् ॥५१
रत्यां कामात्समुद्भूतोऽनिरुद्धो नामदेवता । उषा सा तस्य भगिनी तेन सार्द्धं समुद्भवा ॥५२
कालो नाम स वै कृष्णो राधा तस्य सहोदरा । कर्मरूपः स वै ब्रह्मा नियतिस्तत्सहोदरा ॥५३
धर्मरूपो महादेवः श्रद्धा तस्य सहोदरा । अनिरुद्धः कथं चेशो भवतोक्तः सनातनः ॥५४

---

तक उपासना की ।३६-४१। उससे प्रसन्न होकर देवी ने उसके पास जाकर सहयोग प्रदान पूर्वक महत्तत्त्व की रचना की । पुनः उस महत्तत्त्व से अहंकार और अहंकार द्वारा तन्मात्रा एवं तन्मात्र से पाँच महाभूतों की उत्पत्ति हुई । उसी आकाशादि भूतों द्वारा इस विश्व की रचना हुई है । अतः उन सनातन पुरुष और प्रकृति में पुरुष से प्रकृति ही श्रेष्ठ है और प्रकृति से पुरुष । इसलिए उन दोनों को नमस्कार है । इसे

त्रिधा सृष्टिश्च ब्रह्माण्डे स्थूला सूक्ष्मा च कारणा। स्थूलसृष्टचै समुद्भूतो देवो नारायणः स्वयम् ।।५५
नारायणी च तच्छक्तिस्तयोर्जलसमुद्भवः । जलाज्जातस्स वै शेषस्तस्योपरि समास्थितौ ।।५६
सुप्ते नारायणे देवे नाभेः पङ्कजमुत्तमम् । अनन्तयोजनायाममुदभूच्च ततो विधिः ।।५७
विधेः स्थूलमयी सृष्टिर्देवतिर्य्यङ्नरादिका । सूक्ष्मसृष्ट्चै समुद्भूतः सोऽनिरुद्ध उषापतिः ।।५८
ततो वीर्यमयं तोयं जातं ब्रह्माण्डमस्तके । वीर्याज्जातस्स वै शेषस्तस्योपरि स चास्थितः ।।५९
तस्य नाभेस्समुद्भूतो ब्रह्मा लोकपितामहः । सूक्ष्मसृष्टिस्ततो जाता यथा स्वप्नेऽपि दृश्यते ।।६०
हेतुसृष्टचै समुद्भूतो वेदा नारायणः स्वयम् । वेदात्कालस्ततः कर्म ततो धर्मादयः स्मृताः ।।६१
त्वद्गुरुश्च जगन्नाथ उड्रदेशनिवासकः । मया तत्रैव गन्तव्यं सशिष्येणाद्य भो द्विजाः ।।६२
इति श्रुत्वा तु वचनं कृष्णचैतन्यकिङ्कराः । स्वान्स्वाञ्छिष्यान्समाहूय तत्पश्चात्प्रययुश्च ते ।।६३
शाङ्करा द्वादशगणा रामानुजमुपाययुः । नामदेवादयस्तत्र गणास्सप्त समागताः ।।६४
रामानन्दं नमस्कृत्य संस्थितास्तस्य सेवकाः । रोपणश्च तदागत्य स्वशिष्यैर्बहुभिर्वृतः ।।६५
कृष्णचैतन्यमागम्य नमस्कृत्य स्थितः स्वयम् । जगन्नाथपुरीं ते वै प्रययुर्भक्तितत्पराः ।।६६
निधयः सिद्धयस्तत्र तेषां सेवार्थमागताः । सर्वे च दशसाहस्रा वैष्णवाः शैवशाक्तकैः ।।६७
यज्ञांशं च पुरस्कृत्य जगन्नाथपुरीं ययुः । अर्चावतारो भगवाननिरुद्ध उषापतिः ।।६८

---

सूक्ष्म, एवं कारण के भेद से तीन प्रकार की सृष्टि हुई है जिसमें स्थूल सृष्टि के कर्ता स्वयं नारायण देव हैं, और नारायणी उनकी शक्ति है । उन दोनों से जल की उत्पत्ति हुई एवं उस जल से शेष की उत्पत्ति हुई है, जिस पर वे (नारायण और उनकी नारायणी शक्ति) दोनों सहर्ष सुशोभित हैं । नारायण देव के शयन करने पर उनकी नाभि द्वारा कमल की उत्पत्ति हुई, जो अनन्त योजन तक विस्तृत है । पुनः उसी से ब्रह्मा की उत्पत्ति हुई है । और ब्रह्मा ने देव पशु पक्षी एवं मनुष्यों आदि की स्थूल सृष्टि की रचना की है । सूक्ष्म सृष्टि के लिए उषापति अनिरुद्ध का जन्म हुआ । [illegible]

तदागमनमालोक्य द्विजरूपधरो मुनिः । जगन्नाथः स्वयं प्राप्तो यत्र यज्ञांशकादयः ॥६९
यज्ञांशस्तं समालोक्य नत्वा वचनमब्रवीत् । किं मतं भवता ज्ञातं कलौ प्राप्ते भयानके ॥७०
तत्सर्वं कृपया ब्रूहि श्रोतुमिच्छामि तत्त्वतः । इति श्रुत्वा तु वचनं जगन्नाथो हरिः स्वयम् ॥
उवाच वचनं रम्यं लोकमङ्गलहेतवे ॥७१
मिश्रदेशोद्भवा म्लेच्छाः काश्यपेनैव शासिताः । संस्कृताः शूद्रवर्णेन ब्रह्मवर्णमुपागताः ॥७२
शिखासूत्रं समाधाय पठित्वा वेदमुत्तमम् । यज्ञैश्च पूजयामासुर्देवदेवं शचीपतिम् ॥७३
दुःखितो भगवानिन्द्रः श्वेतद्वीपमुपागतः । स्तुत्यां मां बोधयामास देवमङ्गलहेतवे ॥७४
प्रबुद्धं मां वचः प्राह शृणु देव दयानिधे । शूद्रसंस्कृतमन्नं च खादितुं न द्विजोऽर्हति ॥७५
तथा च शूद्रजनितैर्यज्ञैस्तृप्तिं न चाप्नुयाम् । काश्यपे स्वर्गते प्राप्ते मागधे राज्ञि शासति ॥७६
मम शत्रुर्बलिर्दैत्यः कलिपक्षमुपागतः । निस्तेजाश्च यथाऽहं स्यां तथा वै कर्तुमुद्यतः ॥७७
मिश्रदेशोद्भवे म्लेच्छे सांस्कृती तेन संस्कृता । भाषा देवविनाशाय दैत्यानां वर्द्धनाय च ॥७८
आर्य्येषु प्राकृती भाषा दूषिता तेन वै कृता । अतो मां रक्ष भगवन्भवन्तं शरणागतम् ॥७९
इति श्रुत्वा तदाहं वै देवराजमुवाच ह । भवन्तो द्वादशादित्या गन्तुमर्हन्ति भूतले ॥८०
अहं लोकहितार्थाय जनिष्यामि कलौ युगे । प्रवीणो निपुणोऽभिज्ञः कुशलश्च कृती सुखी ॥८१

---

ब्राह्मण वेष धारण किया और और जहाँगण समेत वे ठहरे थे, उस स्थान पर जगन्नाथ देव स्वयं चले गये । यज्ञांशदेव ने उन्हें देखकर नमस्कार पूर्वक उनसे कहा—इस भयानक कलि के समय आप का कौन सिद्धान्त है, विस्तार पूर्वक उसे बताने की कृपा कीजिये । मैं उसे तत्त्वसमेत जानना चाहता हूँ । इसे सुनकर जगन्नाथ देव ने जो स्वयं विष्णु रूप हैं, लोक के कल्याणार्थ सुन्दर वाणी द्वारा कहना आरम्भ किये—मिश्र

निष्णातः शिक्षितश्चैव सर्वज्ञः सुगतस्तथा । प्रबुद्धश्च तथा बुद्ध आदित्याः क्रमतो भवाः[१] ॥८२
धाता मित्रोऽर्यमा शक्रो मेघः प्रांशुर्भगस्तथा । विवस्वांश्च तथा पूषा सविता त्वाष्ट्रविष्णुकौ ॥
कीकटे देश आगत्य ते सुरा जज्ञिरे क्रमात् ॥८३
वेदनिन्दां पुरस्कृत्य बौद्धशास्त्रमचीकरन् । तेभ्यो वेदान्समादाय मुनिभ्यः प्रददुस्सुराः ॥८४
वेदनिन्दाप्रभावेण ते सुराः कुष्ठिनोऽभवन् । विष्णुदेवमुपागम्य तुष्टुवुर्बौद्धरूपिणम् ॥८५
हरिर्योगबलेनैव तेषां कुष्ठमनाशयत् । तद्दोषान्नग्नभूतश्च बौद्धस्स तेजसाऽभवत् ॥८६
पूर्वार्द्धान्नेमिनाथश्च परार्द्धाद्बौद्ध एव च । बौद्धराज्यविनाशाय दारुपाषाणरूपवान् ॥८७
अहं सिन्धुतटे जातो लोकमङ्गलहेतवे । इन्द्रद्युम्नश्च नृपतिः स्वर्गलोकादुपागतः ॥
मन्दिरं रचितं तेन तत्राहं समुपागतः ॥८८
अत्र स्थितश्च यज्ञांशप्रसादमहिमा महान् । सर्ववाञ्छितदं लोके स्थापयामास मोक्षदम् ॥८९
वर्णधर्मश्च नैवात्र वेदधर्मस्तथा न हि । व्रतं चात्र न यज्ञांशमण्डले योजनान्तरे ॥९०
येनोक्ता यावनी भाषा येन बौद्धो विलोकितः । तस्य प्राप्तं महत्पापं स्थितोऽहं तदघापहः ॥
मां विलोक्य नरः शुद्धः कलिकाले भविष्यति ॥९१

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये कृष्णचैतन्यचरित्रे जगन्नाथमाहात्म्यवर्णनं नाम विंशोऽध्यायः ।२०

---

प्रांशु, भर्ग, विवस्वान्, पूषा, सविता, त्वाष्ट्र, और विष्णु नामक आदित्य देवों ने कीकट देश में जन्म ग्रहण किया । इन लोगों ने वेद की निन्दापूर्वक बौद्ध शास्त्र की रचना की । उन लोगों से वेदों को लेकर मुनियों को प्रदान किया । इसीलिए इस वेद की निन्दा करने के कारण वे सभी देव गण, जो इस भूमण्डल पर आकर उत्पन्न हुए थे, कुष्ठ रोग से पीड़ित होने पर उन बौद्ध रूपी विष्णु देव के पास पहुँचकर उनकी स्तुति करने लगे । [illegible]

# अथैकविंशोऽध्यायः

## कृष्णचैतन्यवर्णनम्

### सूत उवाच

इति श्रुत्वा वचस्तस्य जगन्नाथस्य धीमतः । कृष्णचैतन्य एवापि तमुवाच प्रसन्नधीः ।।१
भगवन्प्राणिनां श्रेयो यदुक्तं भवता मुने । विस्तरात्तत्कथां ब्रूहि यथा बौद्धसमुद्भवः ।।२

### जगन्नाथ उवाच

सहस्राब्दे कलौ प्राप्ते कर्मभूम्यां च भारते । कण्वो नाम मुनिश्रेष्ठस्सम्प्राप्तः कश्यपात्मजः ।।३
आर्यावती देवकन्या कण्वस्य दयिता प्रिया । शक्राज्ञया च सम्प्राप्तौ दम्पती शारदातटे ।।४
सरस्वतीं नदीरूपां कुरुक्षेत्रनिवासिनीम् । चतुर्वेदमयैः स्तोत्रैः कण्वस्तुष्टाव नम्रधीः ।।५
वर्षमात्रान्तरे देवी प्रसन्ना समुपागता । आर्यसृष्टिसमृद्धौ सा ददौ तस्मै वरं शुभम् ।।६
दशपुत्रास्तयोर्जाता आर्यबुद्धिकरा हि ते । उपाध्यायो दीक्षितश्च पाठकः शुक्लमिश्रकौ ।।७
अग्निहोत्री द्विवेदी च त्रिवेदी पाण्ड एव च । चतुर्वेदीति कथिता यथा नाम तथा गुणाः ।।८
ते वै सरस्वतीं देवीं तुष्टुवुर्नम्रकन्धराः । द्वादशाब्दवयोभ्यश्च तेभ्यो देवी स्वशक्तितः ।।
कृत्वा कन्यां ददौ माता शारदा भक्तिवत्सला ।।९

---

# अध्याय २१

उपाध्यायी दीक्षिता च पाठकी शुक्लिका क्रमात् । मिश्राणी च तथा ज्ञेया षष्ठी सा चग्निहोत्रिणी ।।१०
द्विवेदिनी तथा ज्ञेया चाष्टमी च त्रिवेदिनी । पाण्डायनी च नवमी दशमी तुर्यवेदिनी ।।११
तासां च स्वपतिभ्यो वै सुताःषोडश षोडश । ते तु गोत्रकरा ज्ञेयास्तेषां नामानि मे शृणु ।।१२
कश्यपश्च भरद्वाजो विश्वामित्रोऽथ गौतमः । जमदग्निर्वशिष्ठश्च वत्सो गौतम एव च ।।१३
पराशरस्तथा गर्गोऽत्रिर्भृगुश्चांङ्गिरास्तथा । शृंङ्गी कात्यायनश्चैव याज्ञवल्क्यः क्रमात्सुताः ।।
इति नाम्ना सुतास्सर्वे ज्ञेयाः षोडश षोडश ।।१४
सरस्वत्याज्ञया कण्वो मिश्रदेशमुपाययौ । म्लेच्छान्संस्कृतमभाष्य तदा दशसहस्रकान् ।।
वशीकृत्य स्वयम्प्राप्तो ब्रह्मावर्ते महोत्तमे ।।१५
ते सर्वे तपसा देवीं तुष्टुवुश्च सरस्वतीम् । पञ्चवर्षान्तरे देवी प्रादुर्भूता सरस्वती ।।
सपत्नीकाँश्च तान्म्लेच्छाञ्छूद्रवर्णाय चाकरोत् ।।१६
कारुवृत्तिकरास्सर्वे बभूवुर्बहुपुत्रकाः । द्विसहस्रास्तदा तेषां मध्ये वैश्या बभूविरे ।।१७
तन्मध्ये चाचार्यपृथुर्नाम्ना कश्यपसेवकः । तपसा स च तुष्टाव द्वादशाब्दं महामुनिम् ।।१८
तदा प्रसन्नो भगवान्कण्वो देववराद्वरः । तेषां चकार राजानं राजपुत्रपुरं ददौ ।।१९
राजन्या नाम तत्पत्नी मागधं सुषुवे तदा । तस्मै कण्वो ददौ ग्रामं पूर्वस्यां दिशि मागधम् ।।२०
स्वर्गलोकं पुनः प्राप्तः स मुनिः कश्यपात्मजः । स्वर्गते काश्यपे विप्रे ते म्लेच्छाः शूद्रवर्णकाः ।।२१
यज्ञैस्समर्चयामासुर्देवदेवं शचीपतिम् । दुःखितो भगवानिन्द्रस्सबन्धुर्जगतीतले ।।२२

---

उपाध्यायी, दीक्षिता, पाठकी शुक्लानी, मिश्राणी, अग्निहोत्राणी, द्विवेदिनी, त्रिवेदिनी, पाण्डायनी, और चतुर्वेदिनी नाम से प्रख्यात हुई ।३-१०। इन कन्याओं ने अपने उन उपरोक्त पति की सेवाकर सोलह-सोलह पुत्रों को उत्पन्न किया, जो गोत्रवंश के प्रचारक हुए । कश्यप, भरद्वाज, विश्वामित्र, गौतम,

वेदानाहर्तुमिच्छन्तो ब्रह्मयोनौ बभूविरे । जिनो नाम द्विजः कश्चित्तत्पत्नी जयनी स्मृता ।।२३
कश्यपाददितेरंशाज्जातौ तौ कीकटस्थले । तयोस्सकाशात्सञ्जाता आदित्या लोकहेतवे ।।२४
कर्मनाशानदीतीरे पुरी बोधगया स्मृता । तत्रोष्य बौद्धशास्त्राढ्याश्चक्रुः शास्त्रार्थमुत्तमम् ।।२५
वेदाञ्छुद्रेभ्य आहृत्य विशालां प्रययुः पुरीम् । समाधिस्थान्मुनीन्सर्वान्समुत्थाप्य ददुः स्वयम् ।।२६
गतास्सर्वे सुरास्स्वर्गे ततः प्रभृतिभूतले । म्लेच्छा बभूविरे बौद्धास्तदन्ये वेदतत्पराः ।।२७
सरस्वत्याः प्रभावेण त आर्या बहवोऽभवन् । तैश्च देवपितृभ्यश्च हव्यं कव्यं समर्पितम् ।।२८
तृप्तिमन्तः सुराश्चासंस्त आर्याणां सहस्रकाः । सप्तविंशच्छते भूमौ कलौ सवंत्सरे गते ।।२९
बलिना प्रेषितो भूमौ मयः प्राप्तो महासुरः । शाक्यसिंहगुरुर्गेयो बहुमायाप्रवर्तकः ।।३०
स नाम्ना गौतमाचार्यो दैत्यपक्षविवर्द्धकः । सर्वतीर्थेषु तेनैव यन्त्राणि स्थापितानि वै ।।३१
तेषामधो गता ये तु बौद्धाश्चासन्समन्ततः । शिखासूत्रविहीनाश्च बभूवुर्वर्णसङ्कराः ।।३२
दश कोटयः स्मृता आर्या बभूवुर्बौद्धमार्गिणः । पञ्चलक्षास्तदा शेषाः प्रययुर्गिरिमूर्द्धनि ।।३३
चतुर्वेदप्रभावेण राजन्या वह्निवंशजाः । चत्वारिंशभवा योधास्तैश्च बौद्धास्समुज्झिताः ।।३४
आर्यांस्तांस्ते तु संस्कृत्य विन्ध्याद्रेर्दक्षिणे कृतान् । तत्रैव स्थापयामासुर्वर्णरूपान्समन्ततः ।।।
आर्यावर्तः पुण्यभूमिस्तत्रस्थाः पञ्चलक्षकाः ।।३५

## सूत उवाच

इति श्रुत्वा वचस्तस्य यज्ञांशो भगवान्हरिः ।।३६

---

प्रयत्न करना आरम्भ किया। उनका नाम 'जिन' था तथा उनकी पत्नी का नाम 'जयिनी'। इस कीकट नामक प्रदेश में कश्यप और अदिति के संयोग से इन दोनों की उत्पत्ति हुई थी और लोक के मंगलार्थ आदित्यों की भी। कर्मनाशा नदी के तटपर बोधगया नामक स्थान में रहकर उन लोगों ने उन बौद्ध विद्या विदानों से शास्त्रार्थ किया। उन लोगों ने उन शूद्रों से वेदों का अपहरण कर विशाला में पहुँचकर

जगन्नाथस्य शिष्योभूद्वेदमार्गपरायणः । शुक्लदत्तस्य तनयो नित्यानन्दो द्विजोत्तमः ॥३७
जगन्नाथपदं नत्वा शिष्यो भूत्वा रराज ह । तदा प्रसन्नो भगवाननिरुद्ध उषापतिः ॥३८
अभिषेकन्तयोर्भाले महत्तत्वे चकार ह । महत्त्वपदवी जाता तदा प्रभृतिभूतले ॥३९
गुरुबन्धू प्रसन्नौ तौ स्वशिष्यान्प्रोचतुर्मुदा । जगन्नाथस्य वदनं पद्मनाभेरुषापतेः ॥
दृष्ट्वा यश्चात्र सम्प्राप्य स वै स्वर्गमवाप्नुयात् ॥४०
प्रसादं यश्च भुञ्जीयात्तस्य[1] देवस्य सादरम् । कोटिजन्म भवेद्विप्रो वेदपात्रो महाधनी ॥४१
मार्कण्डेय वटे कृष्णं दृष्ट्वा स्नात्वा महोदधौ । इन्द्रद्युम्नसरस्येव पुनर्जन्म न विन्दते ॥४२
इमां गाथां शृणोद्यो[2] वै श्रद्धाभक्तिसमन्वितः । यत्पुरीगमने पुण्यं फलं तच्छीघ्रमाप्नुयात् ॥४३
इति यज्ञांवचनं श्रुत्वा ह्यवतारकः । वैष्णवैश्च तथेत्युक्त्वा तत्रैवान्तरधीयत ॥४४
एतस्मिन्नन्तरे विप्र कलिना प्रार्थितो बलिः । मयदैत्यं समाहूय वचनं प्राह दुःखितः ॥४५
सुकन्दरो म्लेच्छपतिः सदा मद्वर्द्धने रतः । सहायं तस्य दैत्येन्द्र कुरु शीघ्रं ममाज्ञया ॥४६
इति श्रुत्वा बलेर्वाक्यं शतदैत्यसमन्वितः । कर्मभूम्यां मयः प्राप्तः कलविद्याविशारदः ॥४७
म्लेच्छजातीन्नरान्दुष्टान्रेखागणितमुत्तमम् । एकविंशतिमध्यायं कलवेदमशिक्षयत् ॥४८
तदा कलान्विता म्लेच्छाः कलाविद्याविशारदाः । यन्त्राणि कारयामासुः सप्तस्वेव पुरीषु च ॥४९
तदधो ये गतालोकास्ते सर्वे म्लेच्छतां गताः । महत्कोलाहलं जातमार्याणां शोककारिणाम् ॥५०

---

वेदमार्ग का विस्तार करना आरम्भ किया । शुक्लदत्त के पुत्र ब्राह्मण श्रेष्ठ नित्यानन्द ने नमस्कार पूर्वक जगन्नाथ की शिष्य सेवा स्वीकार की । उस समय प्रसन्न होकर उषापति भगवान् अनिरुद्ध ने उन दोनों के मस्तक में महत्त्वपूर्ण अभिषेक (तिलक) किया । उसी समय से पृथ्वी पर महत्त्व पदवी की ख्याति हुई । गुरु एवं उनके बंधु ने प्रसन्न होकर अपने शिष्यों से कहा—उषापति, एवं पद्मनाभ भगवान् जगन्नाथ

श्रुत्वा ते वैष्णवाः सर्वे कृष्णचैतन्यसेवकाः । दिव्यमन्त्रं गुरोश्चैव पठित्वा प्रययुः पुरीम् ॥५१
रामानन्दस्य शिष्यो वै चायोध्यायामुपागतः । कृत्वा विलोमं तं मन्त्रं वैष्णवांस्तानकारयत् ॥५२
भाले त्रिशूलचिह्नं च श्वेतरक्तं तदाभवत् । कण्ठे च तुलसी माला जिह्वा राममयी कृता ॥५३
म्लेच्छास्ते वैष्णवाश्चासन्रामानन्दप्रभावतः । संयोगिनश्च ते ज्ञेया रामानन्दमते स्थिताः ॥५४
आर्याश्च वैष्णवा मुख्या अयोध्यायां बभूविरे । निम्बादित्यो गतो धीमान्सशिष्यः काञ्चिकां पुरीम् ॥
म्लेच्छयन्त्रं राजमार्गे स्थितं तत्र ददर्श ह ॥५५
विलोमं स्वगुरोर्मन्त्रं कृत्वा तत्र स चावसत् । वंशपत्रसमा रेखा ललाटे कण्ठमालिका ॥५६
गोपीवल्लभमन्त्रो हि मुखे तेषां रराज ह । तदधो ये गता लोका वैष्णवाश्च बभूविरे ॥५७
म्लेच्छाः संयोगिनो ज्ञेया आर्यास्तन्मार्गवैष्णवाः । विष्णुस्वामी हरिद्वारे जगाम स्वगणैर्वृतः ॥५८
तत्र स्थितं महायन्त्रं विलोम तच्चकार ह । तदधो ये गता लोका आसन्सर्वे च वैष्णवाः ॥५९
ऊर्ध्वपुण्ड्रं द्विरेखाभं तन्मध्ये बिन्दुरुत्तमः । ललाटे च स्थितस्तेषां कण्ठे तुलसिगोलकम् ॥६०
मुखे साधवमन्त्रश्च बभूव हितदायकः । मथुरायां समायातो मध्वाचार्यो हरिप्रियः ॥६१
राजमार्गे स्थितं यन्त्रं विलोमं स चकार ह । तदधो ये गता लोकां वैष्णवास्तस्य पक्षगाः ॥६२
करवीरपत्रसदृशं ललाटे तिलकं शुभम् । स्थितम् नासार्द्धभागान्ते कण्ठे तुलसि मालिका ॥
राधाकृष्णशुभं नाम मुखे तेषां बभूव ह ॥६३

---

वे सभी म्लेच्छ हो जाते थे। इसे सुनकर आर्यवृन्दों में एक महान् शोकपूर्ण कोलाहल उत्पन्न हुआ। उसे सुनकर कृष्णचैतन्य के सेवक उन वैष्णवों ने अपने गुरु के दिव्य मंत्र के पाठपूर्वक उन पुरियों की यात्रा की। रामानन्द के दोनों शिष्यों ने अयोध्या में पहुँचकर उस मंत्र के विलोम पाठ द्वारा उन वैष्णवों के आकार में परिवर्तन किया—भाल में त्रिशूल का चिह्न (तिलक) जो श्वेत एवं रक्त वर्ण का होता है, कंठ

शङ्कराचार्य एवापि शैवमार्गपरायणः । रामानुजाज्ञया प्राप्तः पुरीं काशीं गणैर्युतः ।।६४
कृत्वा विलोमं तद्यन्त्रं शैवाश्च तदधोऽभवन् । त्रिपुण्ड्रं च स्थितं भाले कण्ठे रुद्राक्षमालिका ।।
गोविन्दमन्त्रश्च मुखे तेषां तत्र बभूव ह ।।६५
तोतादर्यां च सम्प्राप्तस्तदा रामानुजः सुखी । ऊर्ध्वरेखाद्वयोर्मध्ये सूक्ष्मरेखा च पीतिका ।।
ललाटे तु तथा कण्ठे माला तुलसिका शुभा ।।६६
उज्जयिन्यां च सम्प्राप्तो वराहमिहिरो गुणी । तद्यन्त्रं निष्फलं कृत्वा नराञ्छैवांश्चकार ह ।।६७
चिताभस्मस्थितं भाले कण्ठे रुद्राक्षमालिका । शिवेति मङ्गलं नाम तेषां तत्र बभूव ह ।।६८
कान्यकुब्जे स्वयं प्राप्तो वाणीभूषण एव हि । अर्द्धचन्द्राकृतिं पुण्ड्रं रक्तचन्दनमालिका ।।
देव्याश्च निर्मलं नाम तेषां तत्र बभूव ह ।।६९
धन्वन्तरिः प्रयागे च गत्वा तद्यन्त्रमुत्तमम् । विलोमं कृतवांस्तत्र तदधो ये गता नराः ।।७०
अर्द्धपुण्ड्रं स्मृतं रक्तं सबिन्दु च ललाटके । रक्तचन्दनजा माला कण्ठे तेषां बभूव ह ।।७१
भट्टोजिः स गतो धीमानुत्पलारण्यमुत्तमम् । त्रिपुण्ड्रं च तथा रक्तं कण्ठे रुद्राक्षमालिका ।।
विश्वनाथेतितन्मन्त्रं तेषां तत्र बभूव ह ।।७२
रोपणश्चैष्टिकां प्राप्तस्तद्यन्त्रं चैव निष्फलम् । कृत्वा जने जने तत्र ब्रह्म मार्गम् ददर्श ह ।।७३
जयदेवः स्वयं प्राप्तो द्वारकां विष्णुभक्तिमान् । तद्यन्त्रं निष्फलं यातं तदधो ये गता नराः ।।७४
रक्तरेखा स्थिता भाले चैका कण्ठे तु मालिका । पद्माक्षा मन्त्रगोविन्दस्तत्र तेषां बभूव ह ।।

---

शंकराचार्य ने रामानुज की आज्ञा से अपने गणों समेत काशीपुरी की यात्रा की ।६२-६४। वहाँ पहुँच-कर उन्होंने उस यंत्र को विलोमकर शैवों का प्रचार किया । उसके नीचे आने वाले सभी शैव हुए । उनके मस्तक में त्रिपुंड्र कण्ठ में रुद्राक्ष की माला, और मुख से सदैव गोविंद नाम का उच्चारण हो रहा था ।

एवं ते वैष्णवाः शैवाः शाक्तका बहुधाऽभवन् ॥७५
निर्गुणाः शाक्तका ज्ञेयाः सगुणा वैष्णवाः स्मृताः । निर्गुणाः सगुणा ये तु शैवा ज्ञेया बुधैस्तदा ॥७६
समाधिस्थास्त्रयस्त्रिंशद्देवाः पुण्या बभूविरे । नित्यानन्दः शान्तिपुरे नदीहापत्तने हरिः ॥७७
कबीरो मागधे देशे रैदासस्तु कलिञ्जरे । सधनो नैमिषारण्ये समाधिस्थो बभूव ह ॥७८
अद्यापि संस्थितो विप्र वैष्णवानां गणो महान् । यज्ञभागमहावृद्धिः सञ्जाता मेरुमूर्द्धनि ॥७९
इति ते कथितं विप्र यज्ञांशचरितं शुभम् । यच्छ्रुत्वा च नरा नार्यो महत्पुण्यमवाप्नुयुः ॥
मयाद्या निष्फला दैत्या बलिपार्श्वमुपागताः ॥८०

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये कृष्णचैतन्यचरित्रं नामैकविंशोऽध्यायः ।२१

# अथ द्वाविंशोऽध्यायः

## गुरुण्डमौनराज्यवर्णनम्

### सूत उवाच

इति श्रुत्वा बलिर्दैत्यो देवानां विजयं महत् । रोषणं नाम दैत्येन्द्रं समाहूय वचोऽब्रवीत् ॥१
सुतस्तिमिरलिङ्गस्य सरुषो नाम विश्रुतः । त्वं हि तत्र समागम्य दैत्यकार्यं महत्कुरु ॥२

---

शाक्त गणों की अत्यन्त अभिवृद्धि हुई । विद्वानों ने शाक्त को निर्गुण, वैष्णव को सगुण और निर्गुण सगुण मिश्रित को शैव बताया है । तदनन्तर तैंतीस देवों ने समाधिस्थ होकर इस भूमि को अत्यन्त पावन किया । शान्तिपुर में नित्यानन्द नदीहा में हरि, मागधप्रदेश में कबीर, कलिंजर में रैदास, और

इति श्रुत्वा स वै दैत्यो हृदि विप्राप्तरोषणः । ननाश वेदमार्गस्थान्देहलीदेशमास्थितः ॥३
पञ्चवर्षं कृतं राज्यं तत्सुतो बाबरोऽभवत् । विंशदब्दं कृतं राज्यं होमायुस्तत्सुतोऽभवत् ॥४
होमायुषा मदान्धेन देवताश्च निराकृताः । ते सुराः कृष्णचैतन्यं नदीहोपवने स्थितम् ॥५
तुष्टुवुर्बहुधा तत्र श्रुत्वा क्रुद्धो हरिः स्वयम् । स्वतेजसा च तद्राज्यं विघ्नभूतं चकार ह ॥६
तत्सैन्यजनितैर्लोकैर्होमायुश्च निराकृतः । महाराष्ट्रैस्तदा तत्र शेषशाकः समास्थितः ॥७
देहलीनगरे रम्ये म्लेच्छो राज्यं चकार ह । धर्मकार्यं कृतं तेन तद्राज्यं पञ्चहायनम् ॥८
ब्रह्मचारी मुकुन्दश्च शङ्कराचार्यगोत्रजः । प्रयागे च तपः कुर्वविंशच्छिष्यैर्युतस्थितः ॥९
बाबरेण च धूर्तेन म्लेच्छराजेन देवताः । भ्रंशिता स तदा ज्ञात्वा वह्नौ देहं जुहाव वै ॥१०
तस्य शिष्या गता वह्नौ म्लेच्छनाशनहेतुना । गोदुग्धे च स्थितं रोमं पीत्वा स पयसा मुनिः ॥११
मुकुन्दस्तस्य दोषेण म्लेच्छयोनौ बभूव ह । होमायुषश्च काश्मीरे संस्थितस्यैव पुत्रकः ॥१२
जातमात्रे सुते तस्मिन्वागुवाचा शरीरिणी । अकस्माच्च वरो जातः पुत्रोऽयं सर्वभाग्यवान् ॥१३
पैशाचे दारुणे मार्गे न भूतो न भविष्यति । अतः सोऽकबरो नाम होमायुस्तनयस्तव ॥१४
श्रीधरः श्रीपतिः शम्भुर्वरेण्यश्च मधुव्रती । विमलो देववान्सोमो वर्द्धनो वर्तको रुचिः ॥१५
मान्धाता मानकारी च केशवो माधवो मधुः । देवापिः सोमपाः शूरो मदनो यस्य शिष्यकाः ॥१६

---

अत्यन्त क्रुद्ध होकर वेदमार्ग के अनुयायियों का विनाश करना आरम्भ किया । पाँच वर्ष तक राज्योपभोग करने के उपरांत उसके 'बाबर' नामक पुत्र उत्पन्न हुआ जिसने बीस वर्ष तक राज्य किया । पश्चात् उसके होमायु (हुमायूँ) नामक पुत्र हुआ । उस होमायु ने मदान्ध होकर देवताओं को अपमानितकर देश से निकालना आरम्भ किया, जिससे दुःखी होकर देवों ने नदीहा के उपवन में पहुँचकर भगवान् कृष्णचैतन्य की अनेक भाँति से आराधना की जिसे सुनकर स्वयं विष्णु ने अत्यन्त क्रुद्ध होकर अपने तेज द्वारा उस

स मुकुन्दो द्विजः श्रीमान्दैवात्त्वद्गेहमागतः । इत्याकाशवचः श्रुत्वा होमायुश्च प्रसन्नधीः ॥१७
ददौ दानं क्षुधार्तेभ्यः प्रेम्णा पुत्रमपालयत् । दशाब्दे तनये जाते देहलीदेशमागतः ॥१८
शेषशाङ्कं पराजित्य स च राजा बभूव ह । अब्दं तेन कृतं राज्यं तत्पुत्रश्च नृपोऽभवत् ॥१९
सम्प्राप्तेऽकबरे राज्यं सप्तशिष्याश्च तत्प्रियाः । पूर्वजन्मनि ये मुख्यास्ते प्राप्ता भूपतिं प्रति ॥२०
केशवो गानसेनश्च वैजवाक्स तु माधवः । म्लेच्छास्ते च स्मृतास्तत्र हरिदासो मधुस्तथा ॥२१
मध्वाचार्यकुले जातो वैष्णवः सर्वरागवित् । पूर्जजन्मनि देवापिः स च वीरबलोऽभवत् ॥२२
ब्राह्मणः पाश्चिमात्यो वै वाग्देवीवरदर्पितः । सोमपा मार्नासहश्च गौतमान्वयसम्भवः ॥२३
सेनापतिश्च नृपतेरार्यभूपशिरोमणेः । सूरश्चैव द्विजो जातो दक्षिणश्चैव पण्डितः ॥२४
बिल्वमङ्गल एवापि नाम्ना तन्नृपतेः सखा । नायिकाभेदनिपुणो वेश्यानां स च पारगः ॥२५
मदनो ब्राह्मणो जातः पौर्वात्यः स च नर्तकः । चन्दलो नाम विख्यातो रहः क्रीडाविशारदः ॥२६
अन्यदेशे गताः शिष्यास्तेषां पूर्वास्त्रयोदश । अनपस्य सुतो जातः श्रीधरः शत्रुवेदितः ॥२७
विख्यातस्तुलसीशर्मा पुराणनिपुणः कविः । नारीशिक्षां समादाय राघवानन्दमागतः ॥२८
शिष्यो भूत्वा स्थितः काश्यां रामानन्दमते स्थितः । श्रीपतिः स बभूवान्धो मध्वाचार्यमते स्थितः ॥२९
सूरदास इति ज्ञेयः कृष्णलीलाकरः कविः । शम्भुर्वै चन्द्रभट्टस्य कुले जातो हरिप्रियः ॥३०

---

और मदन शिष्य हैं, वही श्रीमान् मुकुन्द ब्राह्मण दैवात् तुम्हारे यहाँ उत्पन्न हुए हैं। इस प्रकार की आकाशवाणी सुनकर होमायु (हुमायुँ) ने अत्यन्त प्रसन्न होकर क्षुधापीड़ितों को दान देकर अत्यन्त प्रेम से उस पुत्र का लालन-पालन किया। पुत्र की दश वर्ष की अवस्था में उसने दिल्ली आकर शेषशाक को पराजित कर पुनः राजपद को अपने अधीन किया। उसके एक वर्ष राज्य करने के उपरांत अकबर ने उस पद को अलंकृत किया। अकबर के राजपद पर प्रतिष्ठित होने पर पूर्वजन्म के उनके सप्त शिष्यों ने उस

रामानन्दमते संस्थो भक्तकीर्तिपरायणः । वरेण्यः सोग्रभुङ्नामा रामानन्दमते स्थितः ।।३१
ज्ञानध्यानपरो नित्यं भाषाछन्दकरः कविः । मधुव्रती स वै जातो कीलको नाम विश्रुतः ।।३२
रामलीलाकरो धीमान्रामानन्दमते स्थितः । विमलश्च स वै जातः स नाम्नैव दिवाकरः ।।३३
सीतालीलाकरो धीमान्रामानन्दमते स्थितः । देववान्केषवो जातो विष्णुस्वामिमते स्थितः ।।३४
कविप्रियादिरचनां कृत्वा प्रेतत्वमागतः । रामज्योत्स्नामयं ग्रन्थं कृत्वा स्वर्गमुपाययौ ।।३५
सोमो जातः स वै व्यासो निम्बादित्यमते स्थितः । रहः क्रीडामयं ग्रन्थं कृत्वा स्वर्गमुपाययौ ।।३६
वर्द्धनश्च स वै जातो नाम्ना चरणदासकः । ज्ञानमालामयं कृत्वा ग्रन्थं रैदासमार्गगः ।।३७
वर्तकः स च वै जातो रोपणस्य मते स्थितः । रत्नभानुरिति ज्ञेयो भाषाकर्ता च जैमिनेः ।।३८
रुचिश्च रोचनो जातो मध्वाचार्यमते स्थितः । नानागानमयीं लीलां कृत्वा स्वर्गमुपाययौ ।।३९
मान्धाता भूपतिर्नाम कायस्थः स बभूव ह । मध्वाचार्यो भागवतं चक्रे भाषामयं शुभम् ।।४०
मानकारो नारिभावान्नारीदेहमुपागतः । मीरानामेति विख्याता भूपतेस्तनया शुभा ।।४१
मा शोभा च तनौ यस्या गतिर्गजसमाकिल । सा मीरा च बुधैः प्रोक्ता मध्वाचार्यमते स्थिता ।।४२
एवं ते कथितं विप्र भाषाग्रन्थप्रकारणम् । प्रबन्धं मङ्गलकरं कलिकाले भयङ्करे ।।४३
स भूपोऽकबरो नाम कृत्वा राज्यमकण्टकम् । शतार्द्धेन च शिष्यैश्च वैकुण्ठभवनं ययौ ।।४४
सलोमा तनयस्तस्य कृतं राज्यं पितुः समम् । खुर्दकस्तनयस्तस्य दशाब्दं च कृतं पदम् ।।४५

---

कीर्ति को सदैव तन्मय होकर गाया करते थे । वरेण्य सोग्रभुक् नाम से प्रथित होकर रामानन्द का मत स्वीकार किया । जो ज्ञानी ध्यानी होते हुए भाषा छन्द के निपुण कवि हुए थे । मधु का कीलक नाम से ख्याति हुई, जो रामलीला करने वाले एवं रामानन्द के मतावलम्बी थे विमल दिवाकर नाम से प्रख्यात होकर सीता जी की लीला करते हुए रामानन्द के परमभक्त हुए । देवबाबू ने केशव नाम से प्रथित होकर

चत्वारस्तनयास्तस्य नवरङ्गो हि मध्यमः । पितरं च तथा भ्रातॄञ्जित्वा राज्यमचीकरत् ॥४६
पूर्वजन्मनि दैत्योऽयमन्धको नाम विश्रुतः । कर्मभूम्यां तदंशेन दैत्यराजाज्ञया ययौ ॥४७
तेनैव बहुधा मूर्तीर्भ्रंशिताश्च समन्ततः । दृष्ट्वा देवास्तदागत्य कृष्णचैतन्यमब्रुवन् ॥४८
भगवन्दैत्यराजांशः स जातश्च महीपतिः । भ्रंशयित्वा सुरान्वेदान्दैत्यपक्षं विवर्द्धते ॥४९
इति श्रुत्वा स यज्ञांशो नदीहोपवने स्थितः । शशाप तं दुराचारं यथा वंशक्षयो भवेत् ॥५०
राज्यमेकोनपञ्चाशत्कृतं तेन दुरात्मना । सेवाजयो नाम नृपो देवपक्षविवर्द्धनः ॥५१
महाराष्ट्रद्विजस्तस्य युद्धविद्याविशारदः । हत्वा तं च दुराचारं तत्पुत्राय च तत्पदम् ॥५२
दत्वा ययौ दाक्षिणात्ये देशे देवविवर्द्धनः । अलोमा नामतनयः पञ्चाब्दं तत्पदं कृतम् ॥५३
तत्पश्चान्मरणं प्राप्तो विद्रधेन रुजा मुने । विक्रमस्य गते राज्ये सप्तत्युत्तरकं शतम् ॥५४
ज्ञेयं सप्त दशं विप्र यदालोमा मृतिं गतः । तालनस्य कुले जातो म्लेच्छः फलरुषो बली ॥५५
मुकुलस्य कुलं हत्वा स्वयं राज्यं चकार ह । दशाब्दं च कृतं राज्यं तेन भूपेन भूतले ॥५६
शत्रुभिर्मरणं प्राप्तो दैत्यलोकमुपागमत् । महामदस्तत्तनयो विंशत्यब्दं कृतं पदम् ॥५७
तद्राष्ट्रे नादरो नाम दैत्यो देश उपागमत् । हत्वार्यांश्च सुराञ्जित्वा देशं खुरजमाययौ ॥५८
महामत्स्यो हि मदस्य तनयस्तत्पितुः पदम् । गृहीत्वा पञ्चवर्षान्तं स च राज्यं चकार ह ॥५९
महाराष्ट्रैर्हतो दुष्टस्तालनान्वयसम्भवः । देहलीनगरे राज्यं दशाब्दं माधवेन वै ॥६०

---

जिसने दश वर्ष तक राज्य किया। उसके चार पुत्रों में नवरंग (औरङ्गजेब) मध्यम पुत्र था जिसने अपने पिता और भ्राताओं पर विजय प्राप्तकर राज्यपद अपने अधीन किया। पूर्वजन्म में वह अन्धक नामक दैत्य था। दैत्यराज बलि की आज्ञा से उसने इस कर्मभूमि भारत में जन्म ग्रहण किया, जिसके द्वारा अनेकों देवमूर्तियाँ भ्रष्ट की गई थीं। उसे देखकर देवों ने कृष्णचैतन्य से कहा—भगवन्! वह दैत्यराज के

कृतं तत्र तदा म्लेच्छ आलोमा राज्यमाप्तवान् । तद्राष्ट्रे बहवो जाता राजानो निजदेशजाः ॥६१
ग्रामपा बहवो भूपा देशे देशे बभूविरे । मण्डलीकपदं तत्राक्षयं जातं महीतले ॥६२
त्रिंशदब्दमतो जातं ग्रामे ग्रामे नृपे नृपे । तदा तु सकला देवाः कृष्णचैतन्यमाययुः ॥६३
यज्ञांशश्च हरिः साक्षाज्ज्ञात्वा दुःखं महीतले । मुहूर्तं ध्यानमागम्य देवान्वचनमब्रवीत् ॥६४
पुरा तु राघवो धीमाञ्जित्वा रावणराक्षसम् । कपीनुज्जीवयामास सुधावर्षैस्समन्ततः ॥६५
विकटो वृजिलो जालो वरलीनो हि सिंहलः । जवस्सुमात्रश्च तथा नाम्ना ते क्षुद्रवानराः ॥६६
रामचन्द्रं वचः प्राहुर्देहि नो वाञ्छितं प्रभो । रामो दाशरथिः श्रीमाञ्ज्ञात्वा तेषां मनोरथम् ॥६७
देवाङ्गनोद्भवाः कन्या रावणाल्लोकरावणात् । दत्त्वा तेभ्यो हरिस्साक्षाद्वचनं प्राह हर्षितः ॥६८
भवन्नाम्ना च ये द्वीपा जालन्धरविनिर्मिताः । तेषु राज्ञो भविष्यन्ति भवन्तो हितकारिणः ॥६९
नन्दिन्या गोश्च रुण्डाद्वै जाता म्लेच्छा भयानकाः । गुरुण्डा जातयस्तेषां तास्तु तेषु सदा स्थिताः ॥७०
जित्वा तांश्च गुरुण्डान्वै कुरुध्वं राज्यमुत्तमम् । इति श्रुत्वा हरिं नत्वा द्वीपेषु प्रययुर्मुदा ॥७१
विकटान्वयसम्भूता गुरुण्डा वानराननाः । वाणिज्यार्थमिहायाता गौरुण्डा बौद्धमार्गिणः ॥७२
ईशपुत्रमते संस्थास्तेषां हृदयमुत्तमम् । सत्यव्रतं कामजितमक्रोधं सूर्यतत्परम् ॥७३
यूयं तत्रोष्य कार्यं च नृणां कुरुत मा चिरम् । इति श्रुत्वा तु ते देवाः कुर्युरार्चिकमादरात् ॥७४

---

सिंहासनासीन होकर माधव ने दश वर्ष तक राज्य किया । उन्होंने आलोमा के समस्त राज्यपर अपना आधिपत्य स्थापित किया था । उस राज्य में अपने देश के अनेक लोग राजा थे और अनेक ग्रामपति भी अनेक देशों में राज्यपद पर रहकर राज्य कर रहे थे उस समय मण्डलीक पद के नष्ट होने पर प्रत्येक गाँवों के अधिपति राजा कहे जाते थे । इस प्रकार उन राजाओं के उस पद पर तीस वर्ष व्यतीत हो जाने के उपरांत समस्त देवों ने कृष्णचैतन्य के पास जाकर उनसे कहा । जिसे सुनकर साक्षात् विष्णु रूप यज्ञांश-देव ने पृथिवी तल पर लोगों को दुःखी देखकर एक मुहूर्त ध्यान करने के

नगर्य्यां कलिकातायां स्थापयामासुरुद्यताः । विकटे पश्चिमे द्वीपे तत्पत्नी विकटावती ॥७५
अष्टकौशलमार्गेण राजमन्त्रं चकार ह । तत्पतिस्तु पुलोमार्चिः कलिकातां पुरीं स्थितः ॥७६
विक्रमस्य गते राज्ये शतमष्टादशं कलौ । चत्वारिंशं तथाब्दं च तदा राजा बभूव ह ॥७७
तदन्वये सप्तनृपा गुरुण्डाश्च बभूविरे । चतुष्षष्टिमितं वर्षं राज्यं कृत्वा लयं गताः ॥७८
गुरुण्डे चाष्टमे भूपे प्राप्ते न्यायेन शासति । कलिपक्षो बलिर्दैत्यो मुरं नाम महासुरम् ॥७९
आरुह्य प्रेषयामास देवदेशे महोत्तमे । स मुरो वार्डिलं भूपं वशीकृत्य हृदि स्थितः ॥८०
आर्यधर्मविनाशाय तस्य बुद्धिं चकार ह । मूर्तिसंस्थास्तदा देवा गत्वा यज्ञांशयोगिनम् ॥८१
नमस्कृत्याब्रुवन्सर्वे यथा प्राप्तो मुरोऽसुरः । ज्ञात्वा शशाप कृष्णांशो गुरुण्डान्बौद्धमार्गिणः ॥८२
क्षयं यास्यन्ति ते सर्वे ये मुरस्य वशं गताः । इत्युक्ते वचने तस्मिन्गुरुण्डाः कालनोदिताः ॥८३
स्वसैन्यैश्च क्षयं जग्मुर्वर्षमात्रान्तरे खलाः । सर्वे त्रिंशत्सहस्राश्च प्रययुर्यममन्दिरे ॥८४
वाग्दण्डैस्स च भूपालो वार्डिलो नाशमाप्तवान् । गुरुण्डो नवमः प्राप्तो भेकलो नाम वीर्यवान् ॥८५
न्यायेन कृतवान्राज्यं द्वादशाब्दं प्रयत्नतः । आर्यदेशे च तद्राज्यं बभूव न्यायशासलि ॥८६
लार्डलो नाम विख्यातो गुरुण्डो दशमोहितः । द्वात्रिंशाब्दं च तद्राज्यं कृतं तेनैव धर्मिणा ॥८७
लार्डले स्वर्गते प्राप्ते मकरन्दकुलोद्भवाः । आर्याः प्राप्तास्तदा मौना हिमतुङ्गनिवासिनः ॥८८
बभ्रूवर्णाः सूक्ष्मनसो वर्तुला दीर्घमस्तकाः । एवं लक्षाश्च सम्प्राप्ता देहल्यां बौद्धमार्गिणः ॥८९

---

में राजधानी स्थापित किया । विकट नामक पश्चिम द्वीप के राजा की पत्नी का विकटावती नाम था । जिसने आठ प्रकार के कुशल मार्गों द्वारा वहाँ का शासन संचालित किया उसके पति पुलोमार्चि कलकत्ता में रह रहे थे । उस समय विक्रम काल के अट्ठारह सौ चालीस वर्ष के व्यतीत हो जाने पर राजा हुए थे । उस गुरुण्ड (गोरे अंग्रेज) कुल में सात राजा हुए । गुरुण्ड जाति के आठवें राजा के शासनाधिकार के

आर्जिको नाम वै राजा तेषां तत्र बभूव ह । तस्य पुत्रो देवकणो गङ्गोत्रगिरिमूर्द्धनि ॥९०
द्वादशाब्दं तपो घोरं तेपे राज्यविवृद्धये । तदा भगवती गङ्गा तपसा तस्य धीमतः ॥९१
स्वरूपं स्वेच्छया प्राप्य ब्रह्मलोकं जगाम ह । कुबेरश्च तदागत्य दत्त्वा तस्मै महत्पदम् ॥९२
आर्याणां मण्डलीकं च तत्रैवान्तरधीयत । मण्डलीको देवकर्णो बभूव जनपालकः ॥९३
षष्ट्यब्दं च कृतं राज्यं तेन राज्ञा महीतले । तदन्वयेऽष्ट भूपाश्च बभूवुर्देवपूजकाः ॥९४
द्विशताब्दं पदं कृत्वा स्वर्गलोकमुपाययुः । एकादशश्च यो मौनः पन्नगारिरिति श्रुतः ॥९५
चत्वारिंशच्च वर्षाणि राज्यं कृत्वा प्रयत्नतः। स्वर्गलोकं गतो राजा पन्नगैर्मरणं गतः ॥९६
एवं च मौर्यजातीयैः कृतं राज्यं महीतले ॥९७

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये गुरुण्डमौनराज्यवर्णनं नाम द्वाविंशोऽध्यायः ।२२

# अथ त्रयोविंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

वैक्रमे राज्यविगते चतुष्षष्ट्युत्तरं मुने । द्वाविंशदब्दशतकं भूतनन्दिस्तदा नृपः ॥१

---

गंगोत्री पर्वत के निवासी उसके पुत्र देवकर्ण ने उस राज्य को विस्तृत करने की इच्छा से बारह वर्ष तक घोर तप किया, जिसके प्रभाव से भगवती गंगा ने अपने स्वरूप की प्राप्तिकर स्वेच्छया ब्रह्मलोक की यात्रा की। पश्चात् कुबेर ने उस राजपुत्र के पास जाकर उसे 'आर्यमण्डलीक' नामक महान पद प्रदान किया।

कुबेरयक्षकान्मौनान्धनधान्यसमन्वितान् । सार्द्धलक्षान्कलैर्घोरैर्जित्वा तान्युद्धकारिणः ॥२
किल्किलायां स्वयं राज्यं नागवंशैश्चकार ह । आग्नेय्यां दिशि विख्याता पुण्डरीकेण निर्मिता ॥३
पुरी किलकिला नाम तत्र राजा बभूव ह । पुण्डरीकादयो नागास्तस्मिन्राज्यं प्रशासति ॥४
गेहे गहे जनैस्सर्वैः पूजनीया बभूविरे । स्वाहा स्वधा वषट्कारो देवपूजा महीतले ॥५
त्यक्त्वा देवानुपागम्य संस्थिता मेरुमूर्द्धनि । शक्राज्ञया कुबेरस्तु शूकधान्यं समन्ततः ॥६
यक्षैः षडंशानादाय देवेभ्यः प्रददौ प्रभुः । मणिस्वर्णादिवस्तूनि मौनराज्येषु यानि वै ॥७
दत्तानि तानि कोशेषु पुनर्देवश्चकार ह । मण्डलीकं पदं तेन सत्कृतं भूतनन्दिना ॥८
शतार्द्धं तु ततो राजा शिशुनन्दिर्बभूव ह । नागपूजां पुरस्कृत्य तिरस्कृत्य सुरान्भुवि ॥९
चकार राज्यं विंशाब्दं यशोनन्दिस्ततोऽनुजः । भ्रात्रासनं स्वयं प्राप्तो नागपूजापरायणः ॥१०
पञ्चविंशतिवर्षाणि स च राज्यमचीकरत् । ततस्तत्तनयो राजा स बभूव प्रवीरकः ॥११
एकादशाब्दं तद्राज्यं कर्मभूम्यां प्रकीर्तितम् । कदाचित्स च बाह्लीके सेनया सार्द्धमागतः ॥१२
तत्र तैरभवद्युद्धं पैशाचैर्म्लेच्छदारुणैः । मासमात्रान्तरे म्लेच्छा लक्षसंख्या मृतिं गताः ॥१३
तथा षष्टिसहस्राश्च नागभक्ता लयं गताः । बादलो नाम तद्राजा रोमजस्थो महाबलः ॥१४
यशोनन्दिनमाहूय ददौ जालवतीं सुताम् । गृहीत्वा म्लेच्छराजस्य सुतां गेहमुपागतः ॥१५

---

राजा ने उस समय उन धन-धान्य पूर्ण मौन वंशजों को, जिन्हें कुबेर के यक्ष कहा जाता है, और डेढ़ लाख की संख्या में उपस्थित थे, उन्हें पराजित कर शासन-सूत्र को अपने अधीन किया। उस समय किल्किला में नाग वंश वाले राज्यपद पर प्रतिष्ठित थे जो आग्नेय दिशा में पुण्डरीक द्वारा निर्मित होकर प्रख्यात पुरी थी। पुण्डरीक आदि नाग वहाँ पर राजा हुए। उनके राज्य करते हुए घर-घर में सभी पूजनीय होने लगे

गर्भो जातस्ततस्तस्यां बभूव तनयो बली । बाह्लीको नाम विख्यातो नागपूजनतत्परः ॥१६
तदन्वये नृपा जाता बाह्लीकाश्च त्रयोदश । चतुश्शतानि वर्षाणि कृत्वा राज्यं मृतिं गताः ॥१७
अयोमुखे च बाह्लीके राज्यमत्र प्रशासति । तदा पितृगणास्सर्वे कृष्णचैतन्यमाययुः ॥१८
नत्वोचुर्वचनं तत्र भगवञ्छृणु मे वचः । वयं पितृगणा भूपैर्नागवंश्यैर्निराकृताः ॥१९
श्राद्धतर्पणकर्माणि तैर्वयं वर्द्धितास्सदा । पितृवृद्धात्सोमवृद्धिस्ततो देवाश्च वर्द्धनाः ॥२०
देववृद्धाल्लोकवृद्धिस्तस्माद्ब्रह्मा प्रजापतिः । ब्रह्मवृद्धात्परं हर्षं गेहे गेहे जने जने ॥२१
अतोऽस्मान्रक्ष भगवन्प्रजाः पाहि सनातनीः । इति श्रुत्वा वचस्तेषां यज्ञांशो भगवान्हरिः ॥२२
पुष्यमित्रं धर्मपरमार्यवंशविवर्द्धनम् ॥२३
जातमात्रः स वै बालः षोडशार्द्धवयोऽभवत् । अयोनिर्योनिभूतांस्तानयोमुख पुरस्सरान् ॥२४
जित्वा देशान्निराकृत्य स्वयं राज्यं गृहीतवान् । यक्षा शिवांशतो जातो विक्रमो नाम भूपतिः ॥२५
शकान्गन्धर्वपक्षीयाञ्जित्वा पूज्यो बभूव ह । नागपक्षांस्तथा भूपान्गोलकास्यान्भयङ्करान् ॥२६
पुष्यमित्रस्तदा जित्वा सर्वपूज्योऽभवद्भुवि । सप्तविंशच्छतं वर्षं द्विसप्तत्युत्तरं तथा ॥२७
राज्यं विक्रमतो जातं समाप्तिमगमत्तदा । पुष्यमित्रे राज्यपदं प्राप्ते समभवत्तदा ॥२८
शतवर्षं राज्यपदं तेन धर्मात्मना धृतम् । अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका ॥२९

---

संयोग द्वारा एक बलवान् पुत्र की उत्पत्ति हुई, जो बाह्लीक नाम से प्रख्यात एवं नाग देवों का उपासक था। उसके वंश में उत्पन्न होकर तेरह बाह्लीक राजाओं ने क्रमशः चार सौ वर्ष तक राज्य करने के अनन्तर अपनी देह का परित्याग किया। अधोमुख नामक बाह्लीक के शासनाधिकार के समय पितरगणों ने कृष्णचैतन्य के पास पहुँचकर नमस्कार पूर्वक उनसे कहा— भगवन्! आप हम लोगों की कुछ प्रार्थना

पुरी द्वारवती तेन राज्ञा च पुनरुद्धृताः । कुरुसूकरपद्मानि क्षेत्राणि विविधानि च ।।३०
नैमिषोत्पलवृन्दानां वनक्षेत्राणि भूतले । नानातीर्थानि तेनैव स्थापितानि समन्ततः ।।३१
तदा कलिः स गन्धर्वो देवतापितृदूषकः । ब्राह्मणं वपुरास्थाय पुष्यमित्रमुपागमत् ।।३२
नत्वोवाच प्रियं वाक्यं शृणु भूप दयापर । आर्यदेशे पितृगणाः पूजार्हाः श्राद्धतर्पणैः ।।३३
अज्ञानमिति तज्ज्ञेयं भुवि यत्पितृपूजनम् । मृता ये तु नरा भूमौ पूर्वकर्मवशानुगाः ।।३४
भवन्ति देहवन्तस्ते चतुराशीतिलक्षधा । छद्मना मयदेवेन पितृपूजा विनिर्मिता ।।३५
वृथा श्रमं वृथा कर्म नृणां च पितृपूजनम् । इति श्रुत्वा वचो घोरं विहस्याह महीपतिः ।।३६
भवान्मूर्खो महामूढो न जानीष परं फलम् । भुवर्लोके न ये दृष्टाः शून्यभूताश्च भास्वराः ।।३७
ये तु ते वै पितृगणाः पिण्डरूपविमानगाः । सत्पुत्रैश्च विधानेन पिण्डदानं च यत्कृतम् ।।३८
तद्विमानं नभोजातं सर्वानन्दप्रदायकम् । अब्दमात्रं स्थितिस्तेषां पिण्डपायसरूपिणाम् ।।३९
गीताष्टादशकाध्यायैः सप्तशत्याश्चरित्रकैः । पावितं यत्तु वै पिण्डं त्रिशताब्दं च तत्स्थितिः ।।४०
श्राद्धतर्पणहीना ये दृश्यन्ते मानवा भुवि । ते सर्वे नारका ज्ञेयाः कुलमेकोत्तरं शतम् ।।४१
श्राद्धकर्म महान्धर्मः श्राद्धोऽयं सर्वकारणम् । इति श्रुत्वा स गन्धर्वः कलीराजोऽत्र देहिनाम् ।।४२
नत्वोवाच नृपश्रेष्ठं प्रसन्नवदनो हि सः । सदा भव ममाशु त्वं तवाहं नृप किङ्करः ।।४३

---

(हरिद्वार), काशी, कांची, अवन्तिका और द्वारकापुरी नामक तीर्थ स्थानों का पुनरुद्धार किया था। उन्होंने ही इस भूमण्डल पर चारों ओर कुरु, सूकर (वाराह) पद्म नामक विविध क्षेत्र नैमिषारण्य उत्पलारण्य एवं वृन्दावन और अनेक तीर्थों की स्थापना की थी। उस समय देवता तथा पितरों के निंदक कलि ने गन्धर्वसमेत ब्राह्मणवेष धारणकर राजा पुष्यमित्र के यहाँ प्रस्थान किया। वहाँ पहुँचने पर

कलिमित्रः पुष्यमित्रो भवान्भुवि भवेत्सदा । यथा विक्रमराजस्य वैतालस्य च वै सखा ॥४४
सर्वकार्यकरोऽहं वै तथा तव न संशयः । इत्युक्त्वा च नृपं धीरं समादाय स वै कलिः ॥४५
सप्तद्वीपांस्तथा खण्डान्नभोमार्गाननेकशः । स्वपृष्ठस्थाय राज्ञे च दर्शयामास वीर्यवान् ॥४६
आर्यधर्मं कलौ स्थाप्य नष्टभूतं स वै नृपः । त्यक्त्वा प्राणांश्च यज्ञांशे तेजस्तस्य समागमत् ॥४७
आन्ध्रदेशोद्भवो राजा सुगदो नाम वीर्यवान् । विना भूपं च तं देशं दृष्ट्वा राज्यमचीकरत् ॥४८
विंशदब्दं पदं तेन कर्मभूम्यां च सत्कृतम् । तदन्वये षष्टिनृपा बभूवुर्बहुमार्गिणः ॥४९
पुष्यमित्रगते राज्ये दशोत्तरशतत्रयम् । तस्मिन्काले लयं जग्मुश्चान्ध्रदेशनिवासिनः ॥५०
शतार्द्धाब्दं ततो भूमिर्विना राज्ञा बभूव ह । तदा क्षुद्रा नरा लुब्धा लुण्ठिताश्चौरदारुणैः ॥५१
दारिद्रमगमन्घोरं विना स्वर्णं च भूरभूत् । पुनर्देवश्च भगवान्प्रार्थितस्तानुवाच ह ॥५२
देशे कौशलके जातः सूर्य्यांशाच्च महीपतिः । राक्षसारिरिति ख्यातो देवमार्गपरायणः ॥५३
ममाज्ञया स वै राजा भविष्यति महीतले । इत्युक्त्वान्तर्दधे विष्णुर्देवलोकानुपागमत् ॥५४
राक्षसारिमयोध्यायां स्थापयामासुरेव तम् । आन्ध्रराष्ट्रे च यद्द्रव्यं राक्षसैश्च समाहृतम् ॥५५
तद्द्रव्यं राक्षसाञ्जित्वा ग्रामे ग्रामे चकार सः । तारधातोरष्टमूल्यं सुवर्णं भुवि तत्कृतम् ॥५६
आरधतोः शतं मूल्यं राजतं तेन वै कृतम् । ताम्रधातोः पञ्चमूल्यमारधातोश्च तत्कृतम् ॥५७

---

मित्र नाम इस भूमण्डल में सदैव स्थापित रहेगा । जिस प्रकार राजा विक्रमादित्य के मित्र वैताल उनके सभी कार्य सुसम्पन्न करते थे, उसी में मैं आपकी सेवा पूर्वक समस्त कार्यों को पूरा करूँगा, इतना कहकर उस पराक्रमी कलि ने उस धीर गम्भीर राजा को अपनी पीठ पर बैठाकर आकाश के मार्गों द्वारा उन्हें सातों द्वीपों नव खण्डों के दर्शन कराया । राजा पुष्पमित्र ने कलि के समय सभी प्रदेश में नष्ट प्राय उस

नागधाताः पञ्चमूल्यं भुवि तेनैव निर्मितम् । ताम्रं पवित्रमधिकं नागो वङ्गस्तथोत्तमः ।।५८
लौहधातोः शतं मूल्यं वङ्गोऽसौ तेन सत्कृतः । शतार्द्धाब्दं महीं भुक्त्वा सूर्यलोकमुपाययौ ।।५९
तदन्वये षष्टिनृपा जाता वेदपरायणाः । पुष्यमित्रगते राज्ये चाब्दे सप्तशते गते ।।६०
कौशलान्वयसम्भूता भूपाः स्वर्गमुपाययुः । शतार्द्धाब्दं ततो भूमिर्मण्डलीकं नृपं विना ।।६१
क्षुद्रभूपांश्च बुभुजे देशे देशे च भार्गवः । ततो बैदरदेशीयो नाम्ना भूपो विशारदः ।।६२
आर्यदेशमुपागम्य लक्षसैन्यसमन्वितः । क्षुद्रभूपान्वशीकृत्य मण्डलीको बभूव ह ।।६३
नानाकलैश्च कर्माणि विचित्राणि महीतले । ग्रामे ग्रामे नराश्चक्रुर्वर्णसङ्करकारकाः ।।६४
ब्रह्मक्षत्रमयो वर्णो नाममात्रेण दृश्यते । वैश्यप्राया नरा आर्याः शूद्रप्रायाश्च कारिणः ।।६५
तद्राष्ट्रे मनुजाश्चासन्नाममात्रं सुरार्चकाः । षष्टिवर्षं पदं तेन कर्मभूम्यां च सत्कृतम् ।।६६
ततो नृपा महीं प्राप्ताः षट्सङ्ख्यास्तु तदन्वयाः । पुष्यमित्रगते राष्ट्रे शतषोडशहायनी ।।६७
वैदूरा निधनं जग्मुः कलिकाले भयानके । चतुश्शतानि वर्षाणि क्षुद्ररूपा च भूरभूत् ।।६८
तत्पश्चान्नैषधे राष्ट्रे कालमाली नृपोऽभवत् । क्षुद्रभूपान्वशीकृत्यस्वयं राजा बभूव वै ।।६९
यमाभूया भुवि त्वष्ट्रा नगरी यमुनातटे । निर्मिता योजनायातु कालकालेति विश्रुता ।।७०
तत्रार्यदेश भूपानां पूज्यो राजा स चाभवत् । देवान्पितृंस्तिरस्कृत्य प्रेतपूजां जने जने ।।७१

---

किया। पश्चात् उसी क्रम से नागवंश का भी। और लोहे का सौ वंश मूल्य स्थापित किया। इस भाँति उसने पचास वर्ष तक राज्य पद सुशोभित करनेके उपरांत सूर्यलोक की यात्रा की। अनन्तर उनके कुल के साठ राजाओं ने क्रमशः उस राजपद को सुशोभित करते रहे। पुष्यमित्र के राज्य काल के सात सौ वर्ष व्यतीत हो जाने पर कौशलवंशीय राजाओं ने स्वर्गारोहण किया, जिससे पचास वर्ष तक यह पृथ्वी

कालमाली च कृतवान्देशनैषधसंस्थितः । द्वात्रिंशद्वर्षराज्यं तद्बभूव जनपीडनम् ॥७२
तदन्वये षष्टिनृपा बभूवुः प्रेतपूजकाः । शताब्दांतमभूद्राज्यं तेषां नैषधदेशिनाम् ॥७३
सहस्राब्दं तु तत्पश्चात्क्षुद्रभूपा मही ह्यभूत् । सुरार्चनं वेदमार्गः श्रुतमात्रश्च दृश्यते ॥७४
पुष्यमित्रगते राज्ये चैकत्रिंशच्छते कलौ । द्वात्रिंशदुत्तरे चैव तदा देवाश्च दुःखिताः ॥७५
कृष्णचैतन्यमागम्य नत्वोचुर्वचनं प्रियम् । भगवन्कलिकालेऽद्य वर्णाश्चत्वारिभूतले[1] ॥७६
भ्रष्टाचाराः प्रेतमयाः शतार्द्धाब्दप्रजीविनः । देवान्पितॄंस्तिरस्कृत्य पिशाचान्पूजयन्ति वै ॥७७
ग्रामे ग्रामे च कुध्यानि पूजितानि नरैर्भुवि । दृश्यन्तेऽस्माभिरद्यैव दुःखिताश्च नरा भृशम् ॥७८
भूतप्रेतपिशाचाश्च डाकिनीशाकिनीगणाः । स्वपूजाभिर्मदान्धाश्च निन्दयन्ति सुरान्पितॄन् ॥७९
अतोऽस्मान्दुर्बलान्विद्धि सबलान्भूतनायकान् । कृपया पाहि नः स्वामिञ्छरणागतवत्सल ॥८०
इति श्रुत्वा स यज्ञांशो नदीहोपवने स्थितः । नम्रभूतान्सुरान्प्राह मागधे तु महीपतिः ॥८१
पुरञ्जयो ब्रह्मपरस्तस्य पत्नी पुरञ्जनी । मदाज्ञया तयोः पुत्रो भविष्यति महाबलः ॥८२
विश्वस्फूर्जिरिति ख्यातो ब्रह्ममार्गपरो गुणी । इत्युक्तवचने तस्मिन्गर्भं धत्ते पुरञ्जनी ॥८३
दशमासान्तरे जातो विश्वस्फूर्जिर्महाबलः । जातमात्रे सुते तस्मिन्वागुवाचाशरीरिणी ॥८४
पुष्यमित्रो यथा चासीद्वर्णधर्मप्रवर्तकः । तथायं बालको जातो ब्रह्ममार्गपरो बली ॥८५
करिष्यति परो वर्णान्कलिन्दयदुमद्रकान् । प्रजाश्च ब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥८६

---

उस कालमाली राजा ने प्रजाओं को पीड़ित करते हुए बत्तीस वर्ष तक राज्य किया । तदनन्तर उसके वंशज साठ राजाओं ने जो नैषध देश के निवासी थे, क्रमशः सौ वर्ष तक राज्य किया । पश्चात् एक सहस्र वर्ष तक पुनः पूर्व की भाँति छोटे-छोटे राजाओं ने पृथक्-पृथक् शासन सूत्र ग्रहण किया । उस समय देवों-की पूजा, वैदिकधर्म केवल नाममात्र सुनाई पड़ता था । पुष्यमित्र के राज्यकाल के इकतीस सौ वर्ष

वीर्यवान्क्षत्रमुत्साद्य पद्मवत्याः स वै पुरम् । इत्याकाशवचः श्रुत्वा स नृपस्तु पुरञ्जयः ।।८७
ददौ दानं क्षुधार्तेभ्योऽतिथिभ्यस्सपरिच्छदः । अष्टौ वर्षसहस्राणि चाष्टवर्षशतानि च ।।८८
कर्मभूम्यां कलौ प्राप्ते व्यतीतानि तदा मुने । विश्वस्फूर्जिर्नृपश्चासीन्महाबुद्धो महाबलः ।।८९
क्षुद्रभूपान्वशीकृत्य सर्ववर्णान्नरांस्तदा । स्थापयामास वै ब्रह्मे वर्णे ब्रह्मपरायणे ।।९०
क्षत्रविट्च्छूद्रका वर्णाः पिशाचा वर्णसङ्कराः । गुरुण्डाद्यास्तथा म्लेच्छा ब्राह्मणास्ते बभूविरे ।।९१
सन्ध्यातर्पणदेवानां पूजादिविविधाः क्रियाः । चक्रुस्ते वेदविधिना तुल्यभोजनशीलिनः ।।९२
षष्टिवर्षं कृतं राज्यं तेन सम्यक्कृता मुने । तदन्वये नृपाश्चासन्सहस्रा भुवि विश्रुताः ।।९३
अयुताब्दान्तरे जाता ब्रह्ममार्गपरायणाः । तैश्च दत्तानि भागानि यज्ञमध्ये विधानतः ।।९४
दैत्येभ्यश्च सुरेभ्यश्च तुल्यरूपाणि चागमन् । विस्मिताश्च सुरास्सर्वे यज्ञांशं शरणं ययुः ।।९५
तदुक्तं कारणं ज्ञात्वा शक्रपुत्र उवाच तान् । वेदो नारायणः साक्षाद्विवेकी हंसरूपवान् ।।९६
नृणां च युगभेदेन वर्णभेदं चकार ह । सद्गुणो ब्राह्मणो वर्णः क्षत्रियस्तु रजोगुणः ।।९७
तमोगुणस्तथा वैश्यो गुणसाम्यात्तु शूद्रकः । तृप्तिं यान्ति पितुर्वृन्दा ब्राह्मणैः क्षत्रियैः सुराः ।।९८
वैश्यैश्च यक्षरक्षांसि शूद्रैर्दैत्याश्च दानवाः । एकवर्णे च चत्वारो वर्णाः कायस्थ एव सः ।।९९
भूतप्रेतपिशाचाद्याः कायस्थैस्तर्पितास्सदा । ब्रह्मवर्णे तु वर्णाश्चस्थिताश्चत्वारि साम्प्रतम् ।।१००

---

की स्थापना करते हुए कलि के दमन करने वाला यह राजपुत्र उन दुष्ट बुद्धिवाली प्रजाओं को वैदिक मार्ग के अनुयायी करने के उपरांत दुष्ट राजाओं के विनाश पूर्वक पद्मवतीपुरी की स्थापना करेगा। इस प्रकार की आकाशवाणी सुनकर राजा पुरञ्जय ने क्षुधा पीडितों अतिथियों को वस्त्रादि समेत दान प्रदान किया। मुने ! उस समय कलि के आगमन का आठ सहस्र आठ सौ वर्ष व्यतीत हो चुका था। उस अवसर पर महाबलवान् एवं महाप्रबुद्ध राजा विश्वस्फूर्जि ने छोटे-छोटे राजाओं को अपने अधीनकर सभी वर्ण के

ब्रह्मशङ्करवर्णोऽयं तेभ्यः पूर्वं हि दानवाः । अर्द्धतृप्ता भविष्यन्ति तत्पश्चात्स्वर्गवासिनः ।।१०१
अतोऽहं च कलौ घोरे युष्मदर्थे महीतले । सौराष्ट्नृपतेर्गेहं स्वांशाद्यास्यामि भोः सुराः ।।१०२
इत्युक्त्वा स च यज्ञांशः सोमनाथः कलैकया । नाम्ना बभूव तद्‌गेहे सौराष्ट्रनगरीस्थितः ।।१०३
जित्वा भूपान्स्वयं राज्यं चकाराब्धितटे मुदा । क्षत्रवर्णमयी भूमिस्तदा जाता कलौ युगे ।।१०४
सोमनाथः स वै यज्ञैः सुरान्सर्वानतर्पयत् । शताब्दं च कृतं राज्यं तेन देवप्रसादतः ।।१०५
तस्य राज्यमयं संवदभवल्लोकविश्रुतम् । तदन्वये सार्द्धशतं भूपाश्चासन्सुरप्रियाः ।।१०६
अयुताब्दान्तरे किञ्चिदधिके च सुखप्रदाः । कर्मभूम्यां कलौ प्राप्ते हायना अयुतत्रयम् ।।१०७
व्यतीतं च ततो दैत्या दुःखिताः कलिमब्रुवन् । पुरास्समाभिः शताब्दं च तपसा वै महेश्वरः ।।१०८
तुष्टीकृतस्तदास्मभ्यं भवान्दत्तो हितेन वै । अर्धभागं वज्रमयमर्धभागं च कोमलम् ।।१०९
तवाङ्गं सुन्दरं देव कलेऽस्मान्रक्ष दुःखितान् । इति श्रुत्वा च स कलिर्दैत्यपक्षविवर्द्धनः ।।११०
स्वांशाज्जन्म कलौ प्राप्य गुर्जरे देशदारुणे । आभीरी सिंहिका नाम सिंहमांसाशना खला ।।१११
तस्या योनौ समागम्य राहुर्नाम स चाभवत् । यथा राहुर्नभोमार्गे दारुणो हि विधुन्तुदः ।।११२
तथा राहुः कलेरंशो भुवि जातः सुरन्तुदः । जातमात्रे सुते तस्मिन्भूमिकम्पो महानभूत् ।।११३
विपरीता ग्रहाः सर्वे जनयन्ति महद्भयम् । तद्भयात्सकला देवास्त्यक्त्वा मूर्तीः समन्ततः ।।११४

---

वर्ण में चार वर्ण हुए हैं । ये सभी ब्रह्म शंकर वर्ण के हैं । इन सब द्वारा दिये गये यज्ञ-भागों से सबसे पहले दानव अर्धतृप्त होते हैं, फिर स्वर्गीय देवलोग । अतः देववृन्द ! इस भीषण कलि के समय तुम लोगों के हित के लिए मैं भूमण्डल में सौराष्ट्र राजा के यहाँ अपने अंश से अवतरित होने जा रहा हूँ । इतना कहकर यज्ञांशदेव ने अपनी एक कला द्वारा सौराष्ट्र नगरी के अधीश्वर के यहाँ अवतरित होकर सोमनाथ नाम से प्रख्याति प्राप्त की । उन्होंने सभी राजाओं को पराजित कर समुद्र तट पर अपनी राजधानी स्थापित की । उस समय कलियुग में पृथ्वी पर क्षत्रिय वर्ण की अधिकता दिखाई देने लगी । सोमनाथ ने अनेक यज्ञानुष्ठानों की सुसम्पन्नता द्वारा सदैव देवों को

**महेन्द्रं शरणं जग्मुः सुमेरुगिरिमूर्द्धनि । तदर्थे भगवाञ्छक्रस्तुष्टाव जगदम्बिकाम् ॥११५**
**कन्यामूर्तिमयी देवी सुरान्प्राह शिवङ्करी । ममाङ्गदर्शनाद्देवाः क्षुत्तृड्भ्यां च विना सदा ॥११६**
**भवध्वं च ततो यूयं मद्विलोकनतत्पराः । इति श्रुत्वा तु ते देवा हर्षिताः सम्बभूविरे ॥११७**
**आभीरीतनयो राहुः कृत्वा राज्यं शतं समाः । त्यक्त्वा प्राणान्कलौ लीनो बभूव मुनिसत्तम ॥११८**
**तदन्वये सार्द्धशतमयुताब्दान्तरेभवत् । महामदमतं घोरं चिरकालाद्विनाशितम् ॥११९**
**तैः पुनश्चोद्धृतं भूमौ सर्वे म्लेच्छा बभूविरे । न वेदाश्च न देवाश्च न वर्णाश्च कलौ युगे ॥१२०**
**दृश्यन्ते न च मर्यादा कलिकाले तदन्वये । द्विजशेषाः सहस्राश्च पुनरर्वुदमूर्द्धनि ॥१२१**
**द्वादशाब्दं प्रयत्नेन देवानाराधितुं क्षमाः । अर्बुदाच्च समुद्भूतोराजन्यः खड्गचर्मधृक् ॥१२२**
**जित्वा म्लेच्छान्दुराधर्षान्नाम्ना चार्वबली ह्यभूत् । पञ्चयोजनमाना स भूमिरात्मविवृद्धये ॥१२३**
**निर्मिता तेन शुद्धेन नाम्ना चार्वपुरी स्मृता । शनैः शनैरार्यकुलं पुनस्तत्र ववर्द्ध ह ॥१२४**
**शताद्धाब्दं प्रयत्नेन तेन राज्यं महत्कृतम् । तदन्वये सार्द्धशतं नृपाश्चासंस्तदामुने ॥१२५**
**अयुताब्दान्तरे वीरा म्लेच्छमिश्राश्च सङ्कराः । म्लेच्छकन्योद्वहा घोरा नाममात्रार्य्यमार्गगाः ॥१२६**
**तदा मलयदेशस्थैर्म्लेच्छैर्लक्षप्रमाणकैः । आर्वुदार्यैः समं युद्धमभवल्लोमहर्षणम् ॥१२७**

---

सूचना देने लगे। उस समय समस्त देवों ने अपनी मूर्ति का निवास त्यागकर सुमेरु पर्वत के लिए शिखर पर महेन्द्रदेव की शरण प्राप्त की। इसे सुनकर इन्द्र ने भगवती जगदम्बा की आराधना की। तदनन्तर प्रसन्नतापूर्वक कन्यारूप में प्रकट होकर कल्याणकारिणी भगवती ने देवों से कहा—देववृन्द ! मेरे अंग दर्शन के फलस्वरूप तुम्हें क्षुधा एवं पिपासा का नष्ट नहीं होगा, इसी भाँति सदैव यहाँ स्थित रहकर तुम लोग मेरा दर्शन करते रहो। इसे सुनकर देवों ने सहर्ष उसे स्वीकार कर किया। मुनिसत्तम ! वह आभीरी (अहीरिन) का पुत्र राहु सौ वर्ष तक राज्य करके अपने प्राण के परित्याग पूर्वक कलि में विलीन

वर्षमात्रान्तरे जित्वा मालवस्था महाबलाः । मण्डलीकपदातैश्च मुक्तमार्यैः समन्ततः ॥१२८
चत्वारिंशत्सहस्राणि वर्षाणि जगतीतले । म्लेच्छभूपाश्च शतशो बभूवुः स्वल्पजीविनः ॥१२९
पंचविंशत्सहस्राणि तेषां संख्या च भूभुजाम् । ये तु पुण्या महीपालाः पूर्वजन्मतपोद्भवाः ॥१३०
तेषां लीला च मुनिभिः पुराणेषु प्रकीर्तिता । नानासंवत्करा: सर्वे पैशाचा धर्मदूषकाः ॥१३१
नवत्यब्दसहस्राणि व्यतीतानि कलौ युगे । जाता म्लेच्छमयी भूमिरलक्ष्मीस्तु जनेजने ॥१३२

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चयवर्णनं नाम त्रयोविंशोऽध्यायः ।२३

# अथ चतुर्विंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

ततस्ते सकला दैत्याः कलिना च पुरस्कृताः । कृत्वा च जलयानानि हरिखण्डमुपाययुः ॥१
मनुजा हरिखण्डे च देवतुल्या महाबलाः । अयुध्यंस्तान्महाशस्त्रैरयुताब्दप्रजीविनः ॥२
दशवर्षान्तरे सर्वे मायायुद्धैः पराजिताः । महेन्द्रं शरणं जग्मुर्हरिखण्डनिवासिनः ॥३

---

चढ़ाई की जिससे एक वर्ष तक रोमाञ्चकारी युद्ध होता रहा। उस भयानक युद्ध में मालवदेश के महाबली म्लेच्छों ने जो राजा के पैदल सैनिक थे, राजा को पराजित कर आर्यों को उनके देश से निकाल दिया। इस प्रकार उन म्लेच्छ भूपों ने क्रमशः इस भूमण्डल पर चालीस सहस्र वर्ष तक राज्य किया, उन स्वल्पजीवी म्लेच्छ राजाओं की संख्या पच्चीस सहस्र थी। उनमें जो पुण्यात्मा राजा थे, जिन्होंने पूर्व जन्म के तप द्वारा राज्यपद की प्राप्ति की थी, उन्हीं के चरित्रों का वर्णन मुनियों ने पुराणों में किया है। वे अनेक भाँति के संवत्सरकर्ता...

तदा तु भगवाञ्छक्रो विश्वकर्माणमब्रवीत् । भ्रमिश्च नामयन्त्रोऽयं संस्थितः सप्तसिन्धुषु ॥४
त्वया विरचितस्तात तत्प्रभावान्नरा भुवि । अन्यखण्डे न गच्छन्ति स च यन्त्रस्तु मायिना ॥५
मयेन भ्रंशितो भ्रात्रा म्लेच्छैः सार्द्धं समन्ततः । सप्तद्वीपेषु यास्यन्ति मनुजा मम बैरिणः ॥६
अतो नः पाहि मर्यादां भूमध्ये भवता कृताम् । इति श्रुत्वा विश्वकर्मा दिव्ययन्त्रमचीकरत् ॥७
तेन यन्त्रप्रभावेन भ्रमितास्ते बभूविरे । भ्रमियन्त्रान्महावायुर्ज्जातो म्लेच्छविनाशकः ॥८
तद्वायोरभवत्पुत्रो वात्यो वात्यासमुद्भवः । दैत्ययक्षांश्च पैशाचाञ्जित्वा ज्ञानमयो बली ॥९
ब्राह्मणाः क्षत्रिया वैश्यास्त्रिवर्णास्तेन सत्कृताः । बलान्म्लेच्छान्वर्णमयान्कृत्वा वात्यो महाबलः ॥१०
शतार्द्धाब्दं मण्डलीकं पदं भुवि गृहीतवान् । तदन्वये सहस्राश्च नृपाश्चासन्कलौ युगे ॥११
वायुपक्षास्त्रिवर्णाढ्याः षोडशाब्दसहस्रके । वायोर्जातः स्वयं ब्रह्मा वायोर्जातः स वै हरिः ॥१२
वायोर्जातो महादेवः सर्वं वायुमयं जगत् । विना वायुं मृताः सर्वे वायुना भुवि जीविनः ॥१३
इति मत्वा तु ते लोका वायुं च समतर्पयन् । पुनस्तदा कलिर्घोरो दैत्यराजं बलिं प्रभुम् ॥१४
नत्वा निवेदयामास दुःखितोऽभूत्तदा बलिः । वामनान्तिकमागम्य कलिमित्रेण संयुतः ॥१५
नत्वोवाच स वै राजा देवदेवं जनार्दनम् । त्वया कलिः कृतो मह्यं प्रसन्नेन सुरोत्तम ॥१६

---

देवेन्द्र ने विश्वकर्मा से कहा—तात ! सातों समुद्रों में तुम्हारे बनाये हुए यंत्र स्थापित हैं, जिससे प्रभावित होकर मनुष्य एक खण्ड से दूसरे खण्ड की यात्रा नहीं कर सकता है, किन्तु उस मायावी मय दैत्य ने उस यंत्र को नष्ट कर दिया, जिससे म्लेच्छों के साथ मेरे शत्रु मनुष्यगण भी सातों द्वीपों में यथेच्छ विचरण कर सकेंगे । इसलिए भूमण्डल की उस मेरी मर्यादा की जो आपके द्वारा निर्धारित हुई है, रक्षा कीजिये । इसे

वात्यैर्द्विजैः कर्मभूमेः कलिस्तु स निराकृतः । एकपादो व्यतीतोऽयं किञ्चिदूनं कलेः प्रभोः ॥१७
मया सम्यक्तु वै मुक्ता भूमिर्देवेन्द्रमायया । सहस्राब्दं कलौ प्राप्ते मया भुक्तं महीतलम् ॥१८
ततः सार्द्धं सहस्राब्दं देवैर्भुक्तं सुरस्थलम् । ततः पंचशतं वर्षं किञ्चिदधिकमेव च ॥१९
मया भुक्ता कर्मभूमिः सर्वलोकस्य कारणात् । ततः सार्द्धं सहस्राब्दं देवैर्भुक्तेयमुत्तमा ॥२०
ततः सार्द्धसहस्राब्दं किञ्चिदूनं मया धृता । सार्द्धत्रिशत्सहस्राब्दं देवैर्दैत्यैस्तथा मही ॥२१
भुक्ता दैत्यैः पुनर्देवैःतथादेवैश्च दानवैः ॥२२
त्वया दत्तो हि मे देव कलिः कलिविनाशन । नाधिकारं कृतं नाथ सत्यं सत्यप्रियक्षम ॥२३
इति श्रुत्वा बलेर्वाक्यं भगवान्वामनो हरिः । स्वांशान्महीतले प्राप्तो दैत्यपक्षविवर्धनः ॥२४
कामशर्मा तदा विप्रो यमुनातटसंस्थितः । हरिं तुष्टाव मनसा द्वादशाब्दं प्रयत्नतः ॥२५
तदा तु वामनः श्रीमान्वचः प्राह द्विजोत्तमम् । वरं ब्रूहि द्विजश्रेष्ठ यत्ते मनसि संस्थितम् ॥
इति श्रुत्वा कामशर्मा तुष्टाव श्लक्ष्णया गिरा ॥२६

## कामशर्मोवाच

नमो देवाय महते सर्वपूज्याय ते नमः ॥२७
धर्मप्रियाय धर्माय देवदैत्यकराय च । दैवाधीननृणां भर्त्रे कर्मकर्त्रे नमो नमः ॥२८

---

जाने पर वात्य के अनुयायी ब्राह्मणों ने उसे वहाँ से अपमान पूर्वक निकाल दिया है। प्रभो! कलि के एक चरण व्यतीत होने में भी अभी कुछ अवशेष समय रह गया है। देवेन्द्र के समान अधिकार पूर्वक मैंने भूमि का भलीभाँति उपभोग कर लिया है। कलि के समय में भी एक सहस्र वर्ष तक मैंने पृथ्वीतल का उपभोग किया है। पश्चात् देवों ने डेढ सहस्र वर्ष तक उस देवभूमि का उपभोग किया। तदनन्तर मैंने सभी लोकों के कारणवश पाँच सौ वर्ण से कुछ अधिक समय तक इस कर्मभूमि (भारत) का सुखोपभोग किया। अनन्तर देवों ने डेढ़ ...

**दैवाधीनाश्च ते देवा दैवोल्लाङ्घ्याश्च दानवाः । तेषां भर्त्ता क्रमाद्धर्ता तस्मै देवाय ते नमः ॥२९**
**पुत्रो भव हरे स्वामिन्सफलं वाञ्छितं कुरु । इति श्रुत्वा हरिः साक्षाद्वामनो बलिरक्षकः ॥३०**
**स्वपूर्वार्द्धाद्देवहूत्यां तत्पत्न्यां च समुद्भवः । द्विधा भूत्वा मही जातौ दिव्याङ्गौ दिव्यविग्रहौ ॥३१**
**भोगसिंहः केलिसिंह देवपो दैत्यपो हरिः । जित्वा वात्योद्भवान्भूपान्कल्पक्षेत्रमुपस्थितः ॥३२**
**रहः क्रीडावती नाम नगरी मयनिर्मिता । तत्रोष्य बलवन्तौ तौ दधतुश्च कलेर्धुरम् ॥३३**
**पत्नीयं सर्वधर्माणां सारभूता सनातनी । पतिव्रतायां ये जाता नरा आर्याः सुरप्रियाः ॥३४**
**दूषितायां नरा जातास्ते सर्वे वर्णसङ्कराः । इति सञ्चिन्त्य भगवान्कृत्वा काममयं वपुः ॥३५**
**दिने दिने सहस्राणि योषितो बुभुजे हरिः । ताः सर्वा गर्भमाधाय यमौ सुषुविरे मुदा ॥३६**
**नार्या तया सहोदर्या रेमिरे ते सहोदराः । एवं च बहुधा सृष्टिस्तेषां जाता कलौ युगे ॥३७**
**पूर्वजातांस्त्रिवर्णाश्च भक्षयित्वा दिनेदिने । कर्मभूम्यां ववृधिरे पक्षिणश्च यथा द्रुमे ॥३८**
**उभयाब्दसहस्रान्ते तैरन्नाः पूर्वमानवाः । तदा कलेश्च चरणो द्वितीयो भुवि चागमत् ॥३९**
**साम्प्रतं वर्तते वार्ता किन्नराणां च भूतले । द्विकिष्कुमात्राश्च नराः सार्द्धा दैत्यमयाः स्मृताः ॥४०**
**यथा खगाः कर्महीनाश्चत्वारिंशाब्दजीविनः । भूमिगाश्च तथा ते वै भेदं तेष्वेषु नैव भोः ॥४१**

---

नमस्कार है । आपके देवगण दैव के अधीन रहते हैं, और दानवगण उस दैव का उल्लंघन करते हैं, क्रमशः उन सबके भर्ता और हर्तारूप आपको नमस्कार है । स्वामिन् ! हरे ! मेरी बहुत बड़ी इच्छा है कि आप मेरे पुत्र हों । कृपाकर इसकी पूर्ति कीजिये । इसे सुनकर साक्षात् विष्णु ने, जो वामन रूप से बलि कीरक्षा करते हैं, अपने पूर्वार्द्धभाग द्वारा देवहूति के यहाँ और पुनः उस ब्राह्मण की पत्नी में अवतरित होने के लिए इस भूतल में दो भागों में विभक्त होकर दिव्यांश और दिव्य शरीर धारण किया । भोगसिंह और केलिसिंह के नाम से उनकी ख्याति हुई, जो देवरक्षक और दैत्यरक्षक थे । उन्होंने वायुकुल के राजाओं पर

दृश्यन्ते चाद्य युष्माभिर्भूतले किन्नरा नराः । द्वितीयचरणान्ते च भविष्यन्त्येवमेव हि ॥४२
न विवाहो न भूपश्च नोद्यमो न हि कर्मकृत् । भविता च तदा तेषां द्वितीयचरणान्तिके ॥४३
सपादलक्षाब्दमितमद्यप्रभृति भो द्विजाः । भोगकेल्यन्वयोद्भूता भविष्यन्ति महीतले ॥४४
अतो मया च सहिता भवन्तो मुनिसत्तमाः । कृष्णचैतन्यमागम्य गमिष्यामस्तदाज्ञया ॥४५

## व्यास उवाच

इति श्रुत्वा तु मुनयो विशालापूर्निवासिनः । भो नमस्ते गमिष्यन्ति यज्ञांशं प्रति हर्षिताः ॥४६
नत्वा सर्वे मुनिश्रेष्ठा यज्ञांशं यज्ञरूपिणम् । वचनं च वदिष्यन्ति देह्याज्ञां भगवन्प्रभो ॥४७
इन्द्रलोकं गमिष्यामो नाकमध्यं मनोहरम् । इति श्रुत्वा तु यज्ञांशः सर्वशिष्यसमन्वितः ॥४८
तैः सर्वैः सह स्वर्लोकं गमिष्यति सुरप्रियः । तदा कलिः समं दैत्यैर्भजिष्यति महीतलम् ॥
किमन्यच्छ्रोतुमिच्छा ते हृषीकोत्तम तद्वद ॥४९

## मनुरुवाच

भगवन्विस्तराद्ब्रूहि भोगकेलिचरित्रकम् । कलौ यथा भविष्यन्ति मनुजास्तत्तथा प्रभो ॥५०

## व्यास उवाच

भोगसिंहे केलिसिंहे वामनांशसमुद्भवे ॥५१
जित्वा दैत्यान्नरमयान्नरान्वात्योद्भवान्भुवि । वामनांशमुपागम्य हर्षिताः सम्बभूविरे ॥५२

---

उसी भाँति आजकल इस मर्त्यलोक में और उनमें कोई भेद नहीं है। आज भूतल में तुम लोगों को किन्नरगण भी दिखाई दे रहे हैं। किन्तु कलि के दूसरे चरण की समाप्ति के अवसर पर ऐसा न होकर अत्यन्त प्रतिकूल दिखायी देगा—उस समय न कोई मनुष्य विवाह करेंगे, न राजा होगा, न कोई उद्यम

तदा तु दुःखिता देवास्त्यक्त्वा मूर्त्तीः समन्ततः । कृष्णचैतन्यमागम्य नत्वोचुर्नतकन्धराः ।।५३
भगवंस्त्वत्प्रसादेन चरणं प्रथमं कलेः । भुक्ता तथा मही स्वामिञ्जित्वा दैत्यप्रपूजकान् ।।५४
किं कर्तव्यं च यज्ञांश नमस्ते करुणाकर । इति श्रुत्वा हरिः प्राह तदा शृणुध्वं सुरसत्तमाः ।।५५
अहं स्वर्गं गमिष्यामि भवद्भिः सह हर्षितः । अतो यूयं सुराः सर्वे देववंशान्नरान्सदा ।।५६
उत्थाप्य शीघ्रमागम्य गच्छध्वं च त्रिविष्टपम् । इति सूतेन कथिते मुनीन्प्रति सुमण्डलम् ।।५७
देवा विमानमादाय तत्र यास्यन्ति भो मनः । सूतादींश्च मुनीन्सर्वान्समारुह्य सुरास्तदा ।।५८
यज्ञांशं च गमिष्यन्ति नदीहोपवने तदा । अह्लादश्च तदा योगी गोरखाद्यास्तथैव च ।।५९
शङ्कराद्याश्च रुद्रांशा नृपो भर्तृहरिस्तदा । अन्ये तु योगनिष्ठाश्च गमिष्यन्ति हितप्रदाः ।।६०
तैः सार्द्धं कृष्णचैतन्यो देवलोकं गमिष्यति । तदा तौ वामनांशौ च द्वितीयचरणे कलौ ।।६१
योगनिष्ठां समाधाय कल्पक्षेत्रे वसिष्यतः । तदैव सकला दैत्या हर्षितास्तैर्नृभिर्मुहुः ।।६२
विवरान्वर्द्धयिष्यन्ति पातालाद्यान्समन्ततः । कलेस्तृतीयचरणे सम्प्राप्ते किन्नराश्च ते ।।६३
शनैःशनैः क्षयं भूमौ गमिष्यन्ति समन्ततः । षड्विंशाब्दसहस्रे च तृतीयचरणे गते ।।६४
रुद्राज्ञया भृङ्गऋषिर्भूतपक्षो गमिष्यति । सौरभी नाम तत्पत्नी जनिष्यति महाबलान् ।।६५
कौलकल्पान्नरान्घोरान्सर्वकिन्नरभक्षकान् । षड्विंशाब्दवयस्तेषां भविष्यति तदा कलौ ।।६६
शरणं वामनांशं च गमिष्यन्ति सकिन्नराः । भोर्गसिंहः केलिसिंहस्तैश्च सार्द्धं महद्रणम् ।।६७

---

उन वामनांश को अपने स्वामी के रूप में पाकर अत्यन्त प्रसन्न हुए। उस समय देवों ने दुःख प्रकट करते हुए सभी मूर्तियों के परित्याग पूर्वक कृष्णचैतन्य के पास पहुँचकर नमस्कार पूर्वक विनय विनम्र होकर उनसे कहा—भगवन् ! आपकी कृपा से कलि के प्रथम चरण के समय तक हमलोगों ने दैत्यों के अधिनायकों को पराजितकर इस पृथ्वी का सुखोपभोग किया। किन्तु करुणेश यज्ञांश देव ! इस समय

करिष्यति दशाब्दं च पुनस्तैश्च पराजितौ । दैत्यैः सार्द्धं च पातालं वामनांशौ गमिष्यतः ॥६८
भृङ्गसृष्टिर्महाघोरा भविष्यति तदा कलौ । मातुः स्वसुः सुतास्ते वै नराश्च पशुरूपिणः ॥६९
भुक्त्वा प्रीत्या च कामान्धा जनिष्यन्ति सुतान्बहून् । कलेस्तृतीयचरणे समाप्ते तास्तु सृष्टयः ॥७०
तिर्य्यग्योनिधरा घोराः क्षयिष्यन्ति कलौ युगे । कलेश्चतुर्थचरणे सम्प्राप्ते तु तदा नराः ॥७१
विंशदब्दवयस्काश्च मरिष्यन्ति च नारकाः । यथा जलमनुष्याश्च यथैव वनजा नराः ॥७२
कन्दमूलफलाहारा भविष्यन्ति कलौ तदा । आलोका ये तु विख्यातास्तामिस्राद्या भयानकाः ॥७३
ते सर्वे पूर्णमेष्यन्ति कर्मभूमिभवैर्नरैः । यथा सत्यस्य प्रथमे चरणे सत्यलोककः ॥७४
द्वितीये च तपोलोके जनलोकस्तृतीयकः । चतुर्थे स्वर्गलोकश्च पूरितः कर्मभूमिजैः ॥७५
त्रेतायुगाद्यचरणे भुवर्लोकं भुवास्पदम् । स्वर्गलोकं यथा तैश्च मनुजैः पूरितं स्मृतम् ॥७६
द्वितीये ऋषिलोकं च तृतीये ग्रहविष्टपम् । चतुर्थे च भुवर्लोकं पूरितं कर्मजैर्नरैः ॥७७
द्वापराद्यपदे पूर्णे भवेद्द्वीपः स पुष्करः । द्वितीये शाल्मलः क्रौञ्चस्तृतीये द्वीपशेषकः ॥७८
जम्बूद्वीपश्चतुर्थे च चरणे मुनिभिः स्मृतः । कलेश्च चरणे चाद्येधश्चोर्ध्वं पूरितं जगत् ॥७९
द्वितीये सप्तपातालस्तृतीये भूतविष्टपम् । पूरितं मनुजैस्तत्र कर्मभूमिसमुद्भवैः ॥८०
तदाद्यनारकास्सर्वे पूर्णमेष्यन्ति तैर्नरैः । इति ते कथितं सर्वं यत्पृष्टोऽहं मनो त्वया ॥८१

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयो नाम चतुर्विंशोऽध्यायः ।२४

---

भोगसिंह और केलिसिंह की शरण में आश्रित होंगे, जिससे उन मनुष्यों के साथ उन दोनों का भीषण युद्ध होगा । किन्तु दश वर्ष के उस युद्ध में वे दोनों पराजित होकर दैत्यों समेत पाताल चले जाँयेगे । उस समय भृंग ऋषि की सृष्टि अत्यन्त घोररूप धारण करेगी—माता, भगिनी एवं पुत्री के साथ पशु के समान वे मनुष्य कामांध होकर सप्रेम रति करके उनके पुत्रों की उत्पत्ति करेंगे । पश्चात् कलि के तीसरे चरण

# अथ पञ्चविंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### व्यास उवाच

चतुर्थचरणे जातैर्मनुजैरेकविंशतिः । अजीर्णभूता नरका यास्यन्ति च यमालयम् ॥१
नमस्ते धर्मराजाय नश्च तृप्तिकराय च । वचनं शृणु सर्वज्ञ नश्च जातमजीर्णकम् ॥२
यथा भजाम प्रकृतिं तथा कुरु सुरोत्तम । इति श्रुत्वा धर्मराजश्चित्रगुप्तेन संयुतः ॥३
ब्रह्माणं च गमिष्यन्ति सन्ध्यायां च कलौ युगे । चतुरश्च यमान्दृष्ट्वा परमेष्ठी पितामहः ॥४
तदीरितं स्वयं ज्ञात्वा क्षीराब्धिं प्रति यास्यति । पूजयित्वा जगन्नाथं देवदेवं वृषाकपिम् ॥५
साङ्ख्यशास्त्रमयैः स्तोत्रैः संस्तोष्यति परम् प्रभुम् ॥६

जय जय जय निर्गुण गुणधारिन्नरगजगजीवतत्त्वशुभकारिन् ।
सारभूतसद्गुणमय तत्त्वैर्देवान्रचयति पाति गुणसत्त्वैः ॥
तस्मै नमो नमो गुणराशे देववृन्दहृदि कृष्णविकाशे ॥७
रजोभूततत्त्वेभ्य उताशु विरचति भुवि च नरान्स्वयमाशु ।
पाति हन्ति यो देव उदारस्तस्य शिरसि संस्थितजगभारः ॥

---

# अध्याय २५

## कलियुगीय इतिहाससमुच्चय का वर्णन

पाहि नाथ नो दैत्यविनाशिन्कालजनितलीलागुणभासिन् ॥८
तेषामिति वचनं प्रभुः श्रुत्वा ह्यवनिमिवाशु । यथा जनिष्यति स प्रभुस्तच्छृणु वै मन आशु ॥९
नम्रीभूतान्सुरान्विष्णुर्नमोवाक्येन तान्प्रति । वदिष्यत वचो रम्यं लोकमङ्गलहेतवे ॥१०
भोः सुराः सम्भलग्रामे कश्यपोऽयं जनिष्यति । नाम्ना विष्णुयशाः ख्यातो विष्णुकीर्तिस्तु तत्प्रिया॥११
कृष्णलीलामयं ग्रन्थं नरांस्ताञ्छ्रावयिष्यति । तदा ते नन्दिनो भूत्वा चैकीभूय समन्ततः ॥१२
तं द्विजं विष्णुयशसं गृहीत्वा निगडैर्दृढैः । बद्ध्वा सर्वे सपत्नीकं कारागारे दृढायसे ॥१३
करिष्यन्ति महाधूर्ता नारका इव दारुणाः । विष्णुकीर्त्यां स भगवान्पूर्णो नारायणो हरिः ॥१४
जनिष्यति महाविष्णुः सर्वलोकशिवङ्करः । निशीथे तमसोद्भूते मार्गकृष्णाष्टमीदिने ॥१५
ब्रह्माण्डं मङ्गलं कुर्वन्सुराः प्रादुर्भविष्यति । ब्रह्म विष्णुर्हरश्चैव गणेशो वासवो गुरुः ॥१६
वह्निः पितृपतिः पक्षो वरुणः सविभीषणः । चित्रो वायुर्ध्रुवो विश्वे रविः सोमः कुजो बुधः ॥१७
गुरुः शुक्रः शनिः राहुः केतुस्तत्र गमिष्यति । पद्यैकैकेन ते देवाः स्तोष्यन्ति परमेश्वरम् ॥१८

महत्तमा मूर्तिमयी तवाजा तदास्य पूर्वाज्जनितोहऽमादौ ।
मया ततं विश्वमिदं सदैव यतो नमस्तत्पुरुषोत्तमाय ॥१९
अजस्य याम्याज्जनितोऽहमादौ विष्णुर्महाकल्पकरोऽधिकारी ।
स्वकीयनाम्ना तु मया ततं तद्विश्वं सदैवं च नमो नमस्ते ॥२०

---

हमारी रक्षा कीजिये । क्योंकि आप कलि के लीला गुणों से प्रकट होते रहते हैं । मन ! उन देवों की ऐसी बातें सुनकर समर्थवान् प्रभु भूतल पर जिस प्रकार शीघ्र अवतरित होंगे, मैं कह रहा हूँ सुनो ! उस समय विनय विनम्र देवों को देखकर विष्णु भगवान् नमः शब्द के उच्चारण पूर्वक देवों से कहेंगे—दैववृन्द !

अव्यक्तपाश्चात्यमुखात्सुजन्मा शिवोऽहमादौ सुरतत्त्वकारी ।
मया महाकल्पकरस्तृतीयात्वदाज्ञया देव नमो नमस्ते ॥२१

प्रधानवक्त्रोत्तरतोऽहमादौ जातो गणेशः किल कल्पकर्ता ।
मया ततं विश्वमिदं सदैव तस्मै नमः कारुणिकोत्तमाय ॥२२

आजर्द्धवक्त्राज्जनितोऽहमादौ मरुन्महाकल्पकरो महेन्द्रः ।
मया ततं विश्वमिदं स्वकल्पे यदाज्ञया देव नमो नमस्ते ॥२३

प्रधानभालाक्षिसमुद्भवोऽहं वह्नेर्महाकल्पकरो गुहाख्यः ।
विनिर्मितं विश्वमिदं मया तद्यदाज्ञया नाथ नमो नमस्ते ॥२४

अजामुखात्पूर्वगताच्च जातश्चादौ महाकल्पकरोऽहमग्निः ।
ब्रह्माण्डमेतच्च मया ततं वै ब्रह्माण्डकल्पाय नमो नमस्ते ॥२५

अजाभुजाद्दक्षिणतोऽहमादौ जातो महाकल्पककरः सधर्मः ।
मया सदेवैरचितं समग्रं लिङ्गाख्यकल्पाय नमो नमस्ते ॥२६

अजाभुजात्पश्चिमतोऽहमादौ जातो महाकल्पकरः स यज्ञः ।
मया ततं विश्वमिदं समग्रं मत्स्याख्यकल्पाय नमो नमस्ते ॥२७

प्रधानबाहूत्तरतोऽहमादौ जातो महाकल्पकरः प्रचेताः ।
मया ततं नाथ तवाज्ञयेदं कर्माख्यकल्पाय नमो नमस्ते ॥२८

---

अव्यक्त के पश्चिम मुख द्वारा मुझ शिव का सर्वप्रथम आविर्भाव हुआ है, मुझे सुरतत्व का कर्ता, एवं अधिकारी बनाया गया है, इसीलिए मैंने आपकी आज्ञा से तीसरे महत्वकल्प का निर्माण किया है । अतः

ब्रह्माण्डतमसो जातस्त्वद्दासोऽहं विभीषणः । मया ततं त्रिलोकं च नमस्ते मनुरूपिणे ॥२९
ब्रह्माण्डसद्‌गुणाज्जातश्चित्तोऽहं मनुकारकः । मया ततं च त्रैलोक्यं स्वायम्भुव नमोऽस्तुते ॥३०
ब्रह्माण्डरजसो जातो वायुर्मन्वन्तरं ततम् । मया स्वारोचिषं स्वामिन्नमस्ते मनुरूपिणे ॥३१
ब्रह्माण्डमनसो जातो ध्रुवोऽहं मनुकारकः । मयोत्तमं च रचितं नमस्तेऽस्तु तवाज्ञया ॥३२
ब्रह्माण्डश्रवणाज्जातो विश्वकर्माहमीश्वरः । मया ततं रैवतं च नमो देव तवाज्ञया ॥३३
ब्रह्माण्डदेहतो जातस्सूर्योऽहं चाक्षुषप्रदः । तवाज्ञया ततं विश्वं मनुरूपाय ते नमः ॥३४
ब्रह्माण्डनेत्रतो जातः सोमोऽहं तु मया ततम् । वैवस्वतान्तरं रम्यं नमस्ते मनुरूपिणे ॥३५
ब्रह्माण्डरसनाज्जातो मोहोऽहं मनुकारकः । नमस्ते मनुरूपाय मया सावर्णिकं ततम् ॥३६
ब्रह्माण्डघ्राणतो जातो बुधोऽहं नाथ किङ्करः । निर्मितं ब्रह्मसावर्णं मया तात नमो नमः ॥३७
ब्रह्माण्डवक्त्रतो जातो जीवोऽहं मनुकारकः । मया वै दक्षसावर्णं ततं तत्ते नमो नमः ॥३८
ब्राह्माण्डकरतो जातः शुक्रोहं तव किङ्करः । निर्मितं रुद्रसावर्णं मया तुभ्यं नमो नमः ॥३९
ब्रह्माण्डपदतो जातोमन्दोऽहं नाथ तेऽनुगः । ततं वै धर्मसावर्णं प्रभातेस्मै नमो नमः ॥४०
ब्रह्माण्डलिङ्गतो जातो राहुश्चाहं तव प्रियः । मया भौमं कृतं नाथ नमस्ते मनुरूपिणे ॥४१

---

का प्रसार किया है, अतः कर्मकल्प नामक आपको नमस्कार है । ब्रह्माण्ड के तम द्वारा आपके दास मुझ विभीषण का जन्म हुआ है, मैंने तीनों लोकों का अत्यन्त प्रसार किया है, अतः मनुरूपी आपको नमस्कार है । ब्रह्माण्ड के सतोगुण से मुझ चित्त की उत्पत्ति हुई । मैंने मनु का निर्माण किया है और तीनों लोकों का प्रसार भी । अतः स्वायम्भुवरूप आपको नमस्कार है । ब्रह्माण्ड के रजोगुण द्वारा मुझ वायु की सर्वप्रथम उत्पत्ति हुई । मैंने आपकी आज्ञा से मन्वन्तर का प्रसार किया है । अतः स्वामिन् ! स्वरोचिष नामक मैं आप मनुरूप को नमस्कार करता हूँ । ब्रह्माण्ड के मानसिक कर्म द्वारा ध्रुव नामक मेरी उत्पत्ति हुई । मैंने आपकी आज्ञा द्वारा मनु निर्माण पूर्वक उस उत्तम की रचना की है ।

ब्रह्माण्डगुह्यतो जातः केतुश्चाहं तवानुगः । भौतं मन्वतरं सृष्टं तस्मै देवाय ते नमः ।।४२

### व्यास उवाच

इति तेषां स्तवान्स्वामी श्रुत्वा देवान्वदिष्यति । वरं ब्रूहीति वचनं ततं प्रति मनुः क्रमात् ।।४३
इति श्रुत्वा तु ते देवा बालरूपं हरिं स्वयम् । नमस्कृत्य वदिष्यन्ति वाञ्छितं लोकहेतवे ।।४४
भवान्ब्रूहि लोकानां कल्पे कल्पे तमुद्भवम् । तथा मन्वन्तरे चैव श्रोतुमिच्छामहे वयम् ।।४५

### कल्क्युवाच

अष्टादश महाकल्पाः प्रकृतेश्च तनौ स्थिताः । आद्यो ब्रह्ममहाकल्पस्तत्र ब्रह्मा परः पुमान् ।।४६
तत्पूर्वार्द्धात्समुद्भूतास्त्रयस्त्रिंशच्च देवताः । परार्द्धाद्भगवान्ब्रह्मा योगिध्येयो निरञ्जनः ।।४७
तस्मिन्कल्पे तु या लीला ब्रह्मपौराणिकैः स्मृता । शतकोटिप्रविस्तारो ब्रह्मपौराणिकस्य वै ।।४८
पुराणपुरुषस्यान्ते महाकल्पः स्मृतो बुधैः । ब्रह्माण्डप्रलये कल्पो युगदैवसहस्रकः ।।४९
कल्पाश्चाष्टादशख्यातास्तेषां नामानि मे शृणु । कूर्मकल्पो मत्स्य कल्पः श्वेतवाराहकल्पकः ।।५०
नृसिंहकल्पश्च तथा तथा वामनकल्पकः । स्कन्दकल्पो रामकल्पः कल्पो भागवतस्तथा ।।५१
तथा मार्कण्डकल्पश्च तथा भविष्यकल्पकः । लिङ्गकल्पस्तथा ज्ञेयस्तथा ब्रह्माण्डकल्पकः ।।५२
अग्निकल्पो वायुकल्पः पद्मकल्पस्तथैव च । शिवकल्पो विष्णुकल्पो ब्रह्मकल्पस्तथा क्रमात् ।।५३
द्विसहस्रमितावर्तैरेषां कल्पो महान्स्मृतः । सहस्रयुगपर्यन्तं ब्रह्माण्डायुः प्रकीर्तितम् ।।५४
यन्नाम्ना च स्मृतः कल्पस्तस्माज्जातो विराडयम् । चतुर्दशमनूनां च मध्ये कल्पः स कालवान् ।।५५

---

अतः मनुरूपी आपको नमस्कार है । तथा ब्रह्माण्ड के गुह्येन्द्रिय द्वारा केतु की उत्पत्ति हुई है, जो आपका अनुगामी है । मैंने भूत मन्वन्तर की सर्जना की है, इसलिए उस देवरूप आपको नमस्कार है ।३३-४२

**व्यास जी बोले**—इस प्रकार उनकी स्तुतियों को सुनकर स्वामी विष्णुदेव उन प्रत्येक देवों से वर

स्वायम्भुवान्तरे यद्वै जातं जातं चतुर्युगम् । तस्मिंश्चतुर्युगे सर्वे नृणामायुर्हरे शृणु ॥५६
लक्षाब्दं वै सत्ययुगे त्रेतायामयुताब्दकम् । द्वापरे च सहस्राब्दं कलौ चायुश्शताब्दकम् ॥५७
स्वारोचिषेऽन्तरे देव जातं जातं चतुर्युगम् । शृणु तत्र नृणामायुस्सत्येऽशीतिसहस्रकम् ॥५८
त्रेतायां च तदर्द्धाब्दं द्वापरे तु तदर्द्धकम् । कलौ द्विक सहस्राब्दं नृणामायुः प्रकीर्तितम् ॥५९
औत्तमस्यान्तरे चैव सत्ये षष्टिसहस्रकम् । त्रेतायां च तदर्द्धाब्दं द्वापरे तु तदर्द्धकम् ॥६०
कलौ सार्द्धसहस्राब्दं नृणामायुः प्रकीर्तितम् । तामसान्तरके चैव षट्त्रिंशाब्दसहस्रकम् ॥६१
नृणामायुः सत्ययुगे त्रेतायां च तदर्द्धकम् । द्वापरे च तदर्द्धाब्दं कलौ वर्षसहस्रकम् ॥६२
रैवतान्तरके चैव सत्ये त्रिंशत्सहस्रकम् । त्रेतायां च तदर्द्धाब्दं द्वापरे च तदर्द्धकम् ॥६३
कलौ चाष्टशताब्दायुर्नृणां वेदैः प्रकीर्तितम् । चाक्षुषान्तरके चैव सत्ये तुर्यसहस्रकम् ॥६४
त्रेतायां त्रिसहस्राब्दं द्वापरे द्विसहस्रकम् । कलौ सहस्रवर्षान्तं नृणामायुः प्रकीर्तितम् ॥६५
वैवस्वतेन्तरे चैव सत्ये तुर्यसहस्रकम् । त्रेतायां त्रिशताब्दं च द्वापरे द्विशताब्दकम् ॥६६
कलौ शताब्दकं प्रोक्तमायुर्वेदैस्तथा नृणाम् । सावर्णिकेऽन्तरे देव नृणां विंशत्सहस्रकम् ॥६७
आयुः सत्ये तदर्द्धं तु त्रेतायां च प्रकीर्तितम् । द्वापरे च तदर्द्धाब्दं तदर्द्धाब्दं तु वै कलौ ॥६८
ब्रह्मसावर्णिके चैव सत्ये दशसहस्रकम् । त्रेतायां च तदर्द्धाब्दं द्वापरे तु तदर्द्धकम् ॥६९
कलौ चैव तदर्द्धाब्दं नृणामायुः प्रकीर्तितम् । दक्षसावर्णिके चैव तथाब्दायुश्चतुर्युगे ॥७०

---

मनुष्यों के मध्य में कालवान् कल्प ही बताया गया है। जिस स्वायम्भुव नामक मन्वन्तर में चारों युग क्रमशः उत्पन्न एवं व्यतीत होते रहते हैं, उन युगों में मनुष्यों की आयु बता रहा हूँ सुनो! सत्ययुग में एक लाख, त्रेतायुग में दश सहस्र, द्वापरयुग में एक सहस्र, और कलियुग में सौ वर्ष की आयु मनुष्यों की होती

रुद्रसावर्णिके चैव सत्ये चाष्टसहस्रकम् । त्रेतायां तदर्द्धाब्दं द्वापरे च तदर्द्धकम् ॥७१
कलौ तदर्द्धकं ज्ञेयं नृणामायुः पुरातने । धर्मसावर्णिके चैव तथाब्दायुश्चतुर्युगे ॥७२
भौममन्वन्तरे चैव सत्ये तुर्यसहस्रकम् । त्रेतायां त्रिसहस्राब्दं द्वापरे च तदर्द्धकम् ॥७३
कलौ तदर्द्धकं ज्ञेयं नरायुश्चार्षसम्मतम् । भौतमन्वन्तरे चैव सत्ये तुर्यशताब्दकम् ॥७४
त्रेतायां त्रिशताब्दं च द्वापरे तु तदर्द्धकम् । तदर्द्धकं कलौ घोरे नृणामायुः प्रकीर्तितम् ॥७५
मन्वन्तरे तु यन्नाम्ना भूपाश्चासंश्चतुर्युगे । तन्नाम्ना च नृपा जातास्तेषां लीलाः पृथक्पृथक् ॥७६
एवमन्यत्र वै ज्ञेयं युगे तुर्ये मनौ मनौ । यो मनुस्तस्य वंशाश्च दिव्यैकयुगसप्ततौ ॥७७
युगान्ते कर्मभूमेश्च लयः कल्पः स वै स्मृतः । मन्वन्ते सर्वभूमेश्च प्रलयः स च कल्पकः ॥७८
पुराणपुरुषस्यैव दिनान्ते प्रलयो हि यः । मुख्यकल्पः स वै ज्ञेयः सर्वलोकविनाशकः ॥७९
षड्विंशत्कल्पसाहस्रैर्महाकल्पो हि यः स्मृतः । यदा पुराणपुरुषो मेषराशौ समास्थितः ॥८०
तदा ब्रह्मा सुरैः सार्द्धं भूपं स्वायम्भुवं गतः । यदा पुराणपुरुषो मकरे च समागतः ॥८१
स्वायम्भुवमनोर्मध्ये वाराहोऽभूत्स वै भुवि । यदा पुराणपुरुषो गतः सिंहे स्वकेच्छया ॥८२
स्वारोचिषमनोरन्ते नृसिंहोऽभूत्स वै भुवि । यदा पुराणपुरुषो वृषराशौ समास्थितः ॥८३
तदौत्तममनोर्मध्ये रुद्रोऽभूत्सगणो भुवि । यदा पुराणपुरुषो मीनराशौ समास्थितः ॥८४

---

चारों युगों में समान आयु होती रही । रुद्र सावर्णि के समय सत्ययुग में आठ सहस्र त्रेता में चार सहस्र, द्वापर में दो सहस्र, तथा कलि में एक सहस्र की आयु मनुष्यों की होती रही । धर्मसावर्णि के समय भी चारों युगों में एक वर्ष की समान आयु होती रही । भौम मन्वन्तर के समय सत्ययुग में चार सहस्र, त्रेता में तीन सहस्र द्वापर में डेढ़ सहस्र एवं कलि में पन्द्रह सौ वर्ष मनुष्यों की आयु होती है । उसी भाँति भौम मन्वन्तर के समय सत्ययुग में चार सौ, त्रेता में तीन सौ, द्वापर में डेढ़ सौ, एवं कलि में साढ़े सात सौ वर्ष की

तामसान्तेऽभवद्मत्स्यः स वै भुवि सनातनः । यदा पुराणपुरुषो युग्मराशौ समास्थितः ॥८५
वैवस्वतमनोर्मध्ये कृष्णोभूद्भुवि स प्रभुः । यदा पुराणपुरुषः कर्कराशौ समास्थितः ॥८६
रैवतान्तेऽभवत्कूर्मः स वै भुवि सनातनः । यदा पुराणपुरुषः कन्याराशौ समास्थितः ॥८७
चाक्षुषान्ते जामदग्न्योऽभवद्रामः स वै भुवि । यदा पुराणपुरुषः प्राप्तोऽलौ च स्वकेच्छया ॥८८
वैवस्वतमनोरादौ वामनोऽभूत्स वै भुवि । यदा पुराणपुरुषस्तुलाराशौ समास्थितः ॥८९
वैवस्वतमनोर्मध्ये कल्की नाम्नाहमागतः । यदा पुराणपुरुषः कुम्भराशौ समास्थितः ॥९०
सार्वणिकादौ भविता बुद्धो नाम्ना स वै भुवि । यदा पुराणपुरुषो धनुराशौ समास्थितः ॥९१
वैवस्वतमनोर्मध्ये रामो दाशरथिर्भुवि । यदा पुराणपुरुषो नक्रराशौ समास्थितः ॥९२
सर्वपूज्यावतारश्च न भवेद्वै कदाचन । अस्मिश्चतुर्युगे देवाः पुराणपुरुषस्य हि ॥९३
त्रयोऽवताराः कथितास्तथा नान्यच्चतुर्युगे । त्रेतायाः प्रथमे पादे रामो दाशरथिः प्रभुः ॥९४
द्वापरस्य तथा कृष्णः शेषेण सह वै भुवि । कलेश्शेषे तथाहं वै द्वात्रिंशाब्दसहस्रके ॥९५
अतः खण्डः पवित्रोऽयं नृणां पातकनाशनः । इमं चतुर्युगं खण्डं यः पठेच्छ्रावयेच्च यः ॥९६
जन्म प्रभृति पापानि तस्य नश्यन्ति नान्यथा । इति वः कथितं देवा महाकल्पचरित्रकम् ॥९७
द्वितीयो यो महाकल्पो विष्णुकल्पः स वै स्मृतः । तत्कथा पठिता देवा विष्णुपौराणिकैर्नरैः ॥९८

---

समय भूतल पर सनातन भगवान् का मत्स्यावतार होता है । पुराण पुरुष के मिथुन राशि पर स्थित होने पर उस वैवस्वत मनु के मध्यकाल में इस वसुन्धरा पर भगवान् कृष्ण का अवतार होता है । उसी प्रकार पुराण पुरुष के कर्क राशिस्थ होने पर उस रैवतअन्त मनु के समय सनातन भगवान् का कूर्मावतार होता है उस पुराण पुरुष के कन्या राशि पर स्थित होने पर उस चाक्षुष मनु का काल होता है, भूतल पर भगवान् राम का जामदग्न्यावतार और उसके [illegible]

शतकोटिप्रविस्तारो विष्णुपौराणिकस्य वै । तत्रैव च महाकल्पो विष्णोर्नाभिसमुद्भवः ।।९९
पूर्वार्द्धाद्भगवान्ब्रह्मा सर्वदेवसमन्वितः । परार्द्धाद्भगवान्विष्णुः पुराणपुरुषः स वै ।।१००
तृतीयो यो महाकल्पः शिवकल्पः स वै स्मृतः । शिवपूर्वार्द्धतो जातो विष्णुस्तस्माद्विधिः स्वयम् ।।१०१
शतकोटिप्रविस्तारः शिवपौराणिकैः स्मृतः । चतुर्थो यो महाकल्पः पद्मकल्पः स वै स्मृतः ।।१०२
गणेशस्तत्र भगवान्पुराणपुरषासने । गणेशावभवद्रुद्रो रुद्राद्विष्णुः सुरोत्तमः ।।१०३
विष्णोर्नाभिसमुद्भूतः परमेष्ठी पितामहः । कल्पेकल्पे क्रमादादौ देवाश्चासन्समन्ततः ।।१०४
पञ्चमो यो महाकल्पो वायुकल्पः स वै स्मृतः । महेन्द्रस्तत्र भगवान्पुराणपुरुषासने ।।१०५
महेन्द्रादभवत्प्राप्तो महेन्द्रादिन्द्रियाणि च । इन्द्रियेभ्यश्च तद्देवास्तेषां नामानि मे शृणु ।।१०६
शनिर्बुधो रविः शुक्रो विश्वकर्मा बृहस्पतिः । इन्द्रो विष्णुस्तथा ब्रह्मा रुद्रः सोमः क्रमात्स्मृताः ।।१०७
सृष्टिकर्ता स वै ब्रह्मा लिङ्गेन्द्रियसमुद्भवः । सृष्टिपाता स वै विष्णुरवतारिपदोद्भवः ।।१०८
चतुर्विंशतितत्त्वेषु कल्पेकल्पे प्रभुर्गतः । सनत्कुमारो हंसश्च वाराहो नारदस्तथा ।।१०९
नारायणौ च कपिलात्रेयौ यज्ञाश्वकण्टकौ । वृषभश्च पृथुर्मत्स्यः कूर्मो धन्वन्तरिस्तथा ।।११०
मोहिनी च नृसिंहश्च वामनो भार्गवस्तथा । रामो व्यासो बलः कृष्णो बुद्धः कल्की स्वतत्त्वगः ।।१११
गुह्यजन्मा महादेवः सृष्टिदैत्यविनाशकः । एवं जातास्त्रयो देवा महाकल्पे च पञ्चमे ।।११२
षष्ठो यस्तु महाकल्पो वह्निकल्पः स वै स्मृतः । स्कन्दस्तत्रैव भगवान्पुराणपुरुषासने ।।११३

---

विस्तृत है । उसी महाकल्प में उस विष्णु भगवान् की नाभि का उत्पन्न होना बताया गया है । जो अपने पूर्वार्द्ध भाग से देव समेत भगवान् ब्रह्मा, और परार्द्ध भाग से पुराणपुरुष कहलाता है । शिवकल्प नामक तीसरे महाकल्प में शिवजी के पूर्वार्द्ध भाग से विष्णु और विष्णु द्वारा स्वयं ब्रह्मा का उत्पन्न होना बताया गया है, जो शिवपुराण के रूप में सौ कोटि का विस्तृत है । पद्मकल्प नामक चौथे महाकल्प में भगवान

पुरुषाव्ययतः स्कन्दः स्कन्दस्तस्मान्महार्चिमान्। सूर्यरूपा महार्चिर्या तस्यां जातो हरिः स्वयम्॥११४
वह्निरूपा महार्चिर्या तस्यां जातः पितामहः। चन्द्ररूपा महार्चिर्या तस्यां जातः स वै हरः॥११५
ऋषयो मुनयो वर्णा लोका जाताः पितामहात्। आदित्या विश्ववसवस्तुषिता भास्वरानिलाः॥११६
महाराजिकसाध्याश्च देवा विष्णुसमुद्भवाः। यक्षराक्षसगन्धर्वाः पिशाचाः किन्नरादयः॥११७
दैत्याश्च दानवा भूतास्तामसा रुद्रसम्भवाः। कल्पे कल्पे समुद्भूतमेवं ब्रह्माण्डगोचरे॥११८
सप्तमो यो महाकल्पः स वै ब्रह्माण्डकल्पकः। पावकस्तत्र भगवान्पुराणपुरुषासने॥११९
अचिन्त्यतेजसस्तस्मात्पुरुषाद्वह्निरुद्भवः। ततो जातो महाब्धिश्च तस्माज्जातं विराण्मयम्॥१२०
रोम्णि रोम्णि ततस्तस्य ब्रह्माण्डाः कोटिशोऽभवन्। ब्रह्माण्डादभवद्ब्रह्मा सर्वलोकपितामहः॥१२१
तस्माज्जातो विभुर्विष्णुस्तस्माज्जातो हरः स्वयम्। शतकोटिप्रविस्तारो ब्रह्माण्डाख्यपुराणके॥१२२
त्रिनेत्रं पञ्चवक्त्रं च दशबाहुर्भवस्य च। अष्टादशानां कल्पानां वायुर्वै वैदिकैः स्मृतः॥१२३
महाकल्पेऽभवन्सर्वे द्विसहस्राः क्षयं गताः। अष्टमो यो महाकल्पो लिङ्गकल्पः स वै स्मृतः॥१२४
तत्रैव भगवान्धर्मः पुराणपुरुषासने। अचिन्त्याव्यक्तरूपश्च जातो धर्मः सनातनः॥१२५
धर्मात्कामः समुद्भूतः कामाल्लिङ्गस्त्रिधाभवत्। पुँल्लिङ्गः क्लीबलिङ्गश्च स्त्रीलिङ्गश्च सुरोत्तम॥१२६
पुँल्लिङ्गादभवद्विष्णुः स्त्रीलिङ्गाच्च महेन्दिरा। क्लीबलिङ्गात्स वै शेषस्तस्योपरि स च स्थितः॥१२७
त्रिभ्यस्तमोमयेभ्यश्च जातमेकार्णवं जगत्। सुप्ते नारायणे देवे नाभेः पङ्कजमुत्तमम्॥१२८

---

स्कन्द होने से उनका स्कन्द नाम हुआ। इसलिए वे महा अर्चिमान् (पूर्णप्रकाश युक्त) कहे गये हैं। उन्हीं सूर्य रूप महार्चि से स्वयं विष्णु की वह्निरूप महार्चि द्वारा पितामह ब्रह्मा और चन्द्र रूप महार्चि द्वारा शिव की उत्पत्ति होती है। इसी भाँति पितामह (ब्रह्मा) द्वारा ऋषि, मुनि, वर्ण एवं लोकों की उत्पत्ति हुई है, विष्णु द्वारा आदित्यगण, विश्वावसु देव, तुषित, भास्वर, अनिल, और महाराजिक साध्व देवी की उत्पत्ति हुई है। और रुद्र द्वारा यक्ष राक्षस, गन्धर्व, पिशाच, किन्नर, दैत्य, दानव एवं भूतगणों की

जातं तस्मात्स वै ब्रह्मा तस्माज्जातो विराडयम्। शतकोटिप्रविस्तारैर्लिङ्गपौराणिकैः कथा ॥१२९
गीता चैव विधेरग्रे तस्य सारोऽयमुत्तमः। नवमो यो महाकल्पो मत्स्यकल्पः स वै स्मृतः ॥१३०
कुबेरस्तत्र भगवान्पुराणपुरुषासने। अव्ययाच्च समुद्भूतो धूलिवृन्दो महांस्तथा ॥१३१
रजोभूताच्च तस्माच्च कुबेरस्य समुद्भवः। कुबेराद्उद्भवन्मत्स्यो वेदमूर्तिश्च सद्गुणः ॥१३२
मत्स्योदरात्समुद्भूतो विष्णुर्नारायणो हरिः। विष्णोर्नाभेः समुद्भूतो ब्रह्मा लोकपितामहः ॥१३३
ब्रह्मणश्चोद्भवं दैवं दैवाद्देवा बभूविरे। चतुर्विंशतितत्त्वानि तैर्देवैर्जनितानि वै ॥१३४
कल्पेकल्पे क्रमादेवं कल्पनामान्यकारयत्। मत्स्यकल्पे तु मत्स्यश्च महामत्स्यात्समुद्भवः ॥१३५
तन्मत्स्याद्भगवान्विष्णुस्ततो ब्रह्मण उद्भवः। कूर्मकल्पे महामत्स्यात्कूर्मो जातः स कच्छपः ॥१३६
कूर्माच्च भगवान्विष्णुस्ततो ब्रह्मा ततो विराट्। श्वेतवाराहकल्पे च वराहाद्विष्णुरुद्भवः ॥१३७
विष्णोर्नाभेश्च स ब्रह्मा ततो जातो विराडयम्। एवं सर्वे च वै कल्पा ज्ञेयाः सर्वत्र वै बुधैः ॥१३८
दशमो यो महाकल्पः कूर्मकल्पः स वै स्मृतः। अचेतास्तत्र भगवान्पुराणपुरुषासने ॥१३९
प्रकृतेश्च परो यो वै तुरीयोऽव्यय एव च। शून्यभूतात्ततो जातः प्रचेता भगवान्स्वयम् ॥१४०
तस्माज्जातो महानब्धिस्तत्र सुष्वाप स प्रभुः। नारायण इति ख्यातः स वै जलपतिः स्वयम् ॥१४१
तदर्द्धाच्च महाकूर्मस्ततः शेषो महानभूत्। त्रिधाऽभवत्स वै शेषो भूमा शेषश्च भौमनी ॥१४२
भूमा स वै विराड् ज्ञेयः शेषोपरि स चास्थितः। भौमनी च महालक्ष्मीः सा भूम्नो हृदि संस्थिता ॥१४३

---

जिससे ब्रह्मा उत्पन्न होते हैं और ब्रह्मा द्वारा यह विराट्! इसलिए लिंग पुराण की कथा सैकड़ों कोटि की विस्तृत है। उसी का साररूप गीता ब्रह्मा के सम्मुख उपस्थित हुआ है। मत्स्यकल्प नामक नवें महाकल्प में भगवान् कुबेर पुराणपुरुष के रूप में प्रतिष्ठित होते हैं। पश्चात् उस अव्यय द्वारा एक अत्यन्त बड़ी धूल राशि उत्पन्न होती है, जिस रजोभूत धूलि द्वारा कुबेर जन्म ग्रहण करते हैं। पुनः कुबेर द्वारा वेदमूर्ति एवं

भूम्नो जातः स वै ब्रह्मा सृष्टिस्थितिविनाशकः। त्रिधामूर्तिः स वै ब्रह्मा कल्पे कल्पे क्रमादयम् ॥१४४
पटं सुषुप्तभूतं यत्पुराणपुरुषासनम् । यत्र गत्वेन्द्रियाण्येव तृप्तिं प्राप्य क्षयन्ति वै ॥१४५
अहङ्कारस्तदागत्य चैतन्यं मनसि स्थितम् । वञ्चयित्वा पुनर्लोकं करोतिस्मस्वलीलया ॥१४६
तुरीयशक्तिर्या ज्ञेया महाकाली सनातनी । महाकल्पैश्च तैःसर्वैस्तदङ्गं श्रुतिभिः स्मृतम् ॥१४७
नमस्तस्यै महाकाल्यै मम मात्रे नमो नमः । यतः पुराणपुरुषा भवन्ति च लियन्ति च ॥१४८
दशैव च महाकल्पा व्यतीता इह भोः सुराः । साम्प्रतं वर्तते यो वै महाकल्पो भविष्यकः ॥१४९
तदुत्पत्तिं शृणुध्वं भो देवाः सर्पिगणा मम । अचिन्त्यमक्षरं यत्तु तुरीयं च सदा स्थितम् ॥१५०
यद्गत्वा न निवर्तन्ते नरास्तत्रैव तत्पदम् । अनेकसृष्टिरचनाः सन्ति तस्यैव लीलया ॥१५१
तस्यान्तं न विदुर्देवाः कथं जानन्ति वै नराः । भूतो भूतो महाकल्पो दृष्टो वैदेस्तदीरितः ॥१५२
भाव्या ये तु महाकल्पा न वै जानन्ति ते सदा । त्र्यस्त्रिंशन्महाकल्पाः कैश्चिद्वेदै रुदीरिताः ॥१५३
अष्टादश महाकल्पाः पृथङ् नाम्नोपवर्णिताः । एकादश महाकल्पाः कैश्चित्प्रोक्ताः पुरातनैः ॥१५४
अतोऽहं निश्चयेनाद्य भाव्यकल्पेषु भोः सुराः । वेदानां वचनं सत्यं नान्यथा च भवेत्क्वचित् ॥१५५
तदव्ययात्समुद्भूतो राधाकृष्णः सनातनः । एकीभूतं द्वयोरङ्गं राधाकृष्णो बुधैः स्मृतः ॥१५६
सहस्रयुगपर्यन्तं यत्तेपे परमं तपः । तदा स च द्विधा जातोः राधाकृष्णः पृथक्पृथक् ॥१५७

(विराट्) के हृदय में स्थित है। उसी भूमा द्वारा सृष्टि, स्थिति एवं उसके विनाशक देवों की उत्पत्ति होती है। वही ब्रह्मा प्रत्येक कल्पों में त्रिधा विभक्त होकर तीनों रूपों को धारण करता है।१२९-१४४। पुराण पुरुष का वह आसन है, जो उसके शयन काल का स्तरण घर रूप है वहाँ पहुँचने पर इन्द्रियाँ तृप्त होकर नष्ट हो जाती है। वह अहंकार चैतन्य रुप से मन में स्थित होता है, उसे वंचितकर अपनी लीला द्वारा जो लोक-निर्माण करती है, वह सनातनी तुरीय शक्ति महाकाली है। समस्त महाकल्प एवं श्रुतियों द्वारा जिसके अंगभूत (लोक कथाओं) ...

सहस्रयुगपर्यन्तं तेपतुस्तौ परं तपः । तयोरङ्गात्समुद्भूता ज्योत्स्ना तमनाशिनी ।।१५८
तज्योत्स्नाभिः समुद् भूतं दिव्यं वृन्दावनं शुभम् । एकविंशत्प्रकृतयो योजने योजने स्मृताः ।।१५९
दिव्यं वृन्दावनं जातं चतुराशीतिसम्मिते । क्रोशायामं महारम्यं तल्लिङ्गं शृणु मे प्रभो ।।१६०
इन्द्रियप्रकृतीनां च दशानां ग्रामतद्दश[1] । गोकुलं वार्षं नान्दं भाण्डीरं माथुरं तथा ।।१६१
वज्रं च यामुनं मान्यं श्रेयस्कं गोपिकं क्रमात् । मात्राभूतदशभ्यश्च प्रकृतिभ्यः समुद्भवम् ।।१६२
तथा दशवनं रम्यं तेषां नामानि मे शृणु । वृन्दावनं गोपवनं बहुलावनमेव च ।।१६३
मधुशृङ्गं कुञ्जवनं वनं दधिवनं तथा । रहः क्रीडावनं रम्यं वेणुपद्मवनं क्रमात् ।।१६४
मनसः प्रकृतेर्जातो गिरिर्गोवर्द्धनो महान् । दिव्यं वृन्दावनं दृष्ट्वा परमानन्दमाप सः ।।१६५
कृष्णादुदभवन्गोपास्तिस्रः कोट्यो गुणात्मकाः । श्रीदामाद्याः सात्त्विकाश्च राजसा अर्जुनादयः ।।१६६
कंसाद्यास्तामसा जाता दिव्यलीलाप्रकारिणः । राधाङ्गादुद्भवा गोप्यस्तिस्रः कोटचस्तथा क्रमात् ।।१६७
ललिताद्याः सात्त्विकाश्च कुब्जाद्या राजसास्तथा । तामसाः पूतनाद्याश्च नानाहेलाचरित्रकाः ।।१६८
सहस्रयुगपर्य्यन्तं तेषां लीला बभूव ह । ततस्तौ तान्समाहृत्य तेपतुश्च पुनस्तपः ।।१६९
द्विधा जातः स वै कृष्णो राधा देवी तथा द्विधा । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।।१७०
पूर्वार्द्धात्स च वै जातः परार्द्धात्कृष्ण एव हि । एकशीर्षा त्रिनेत्रा च द्विपदी द्विसहस्रिका ।।१७१

---

तक पुनः घोर तपस्या की जिससे उन दोनों के अंग मे तम नष्ट करने वाली ज्योत्स्ना का अविर्भाव हुआ। उसी ज्योत्स्ना द्वारा शुभमूर्ति वृन्दावन का निर्माण हुआ, जिसके एक-एक योजन की दूरी पर इक्कीस प्रकृति तत्त्व का सन्निहित होना बताया गया है। वह दिव्य वृन्दावन चौरासी कोश में विस्तृत है। प्रभो! उसके लिंग की व्याख्या कर रहा हूँ सुनो! ।१४५-१६०। दश प्राकृतिक इन्द्रियों द्वारा उसके दश ग्रामों का निर्माण हुआ है—गोकुल, वार्षभ, नान्द, भांडीर, माथुर, व्रज, यामुन, मान्य, श्रेयस्क, एवं

पूर्वार्धात्सा तु वै जाता राधा देवी परार्द्धतः । पुरुषः प्रकृतिश्चोभौ तेपतुः परमं तपः ॥१७२
सहस्रयुगपर्य्यन्तं दिव्ये वृन्दावने शुभे । तपसा ववृधाते तौ नाम्नानन्तो ह्यनन्तकः ॥१७३
एकीभूतौ तु तत्पश्चात्संस्थितौ मैथुनेच्छया । तदङ्गरोमकूपेषु ब्रह्माण्डाः कोटिशोऽभवन् ॥१७४
कोटचर्द्धयोजनायामास्ते तु सर्वे पृथक्पृथक् । हृदि रोमसमुद्भूतो ब्रह्माण्डोऽयं च भोः सुराः ॥१७५
ब्रह्माण्डादुद्भवो ब्रह्मा पद्मपुष्पे समास्थितः । स पद्मो योजनायामो भूमिमण्डलसंस्थितः ॥१७६
यतो जातं विधेः पद्मं तद्वै पद्मसरोवरम् । प्रसिद्धं पुष्करक्षेत्रं तत्पद्मसरसं सुराः ॥१७७
विस्मितः स तदा ब्रह्मा नररूपश्चतुर्मुखः । नाले नाले गतोसौ वै दिव्यं जातं शतं समाः ॥१७८
नान्तं जगाम पद्मस्य पुनर्ब्रह्मा स चागतः । मायया मोहितस्तत्र रुरोद बहुधा तदा ॥१७९
रोदनाद्रुद्र उत्पन्नः स च तत्क्षेमकारकः । किं रोदिषि महाभाग त्वदीशो हृदये तव ॥१८०
इति श्रुत्वा वचस्तस्य ब्रह्मा लोकपितामहः । समाधिभूतो हृदये चिरं तेपे स्वकेच्छया ॥१८१
दिव्यवर्षशताब्दे तु प्रादुर्भूतो हरिः स्वयम् । वचनं प्राह भगवान्मेघगम्भीरया गिरा ॥१८२
कर्मभूमिरियं ब्रह्मञ्जीवान्ता जीवकारिणी । सहस्रयोजनायां तु विश्वस्मिन्भूमिमण्डले ॥१८३
हिमाद्रिरुत्तरे तस्याः पूर्वेऽब्धिश्च महोदधिः । रत्नाकरः पश्चिमेऽब्धिर्दक्षिणे वडवाब्धिकः ॥१८४
अतः सर्वे भविष्यन्ति लोकाश्चोद्ध्र्वं तथा ह्यधः । कर्मभूमेर्मध्यभूतः पुष्करोऽयं सनातनः ॥१८५

---

देवी के पूर्वार्द्ध भाग द्वारा दो सहस्त्र (मूर्ति) उत्पन्न हुई, जिनके एक शिर तीन नेत्र एवं दो चरण हैं और परार्द्ध भाग राधारूप हुआ। उस शुभ एवं दिव्य वृन्दावन में उन प्रकृति-पुरुष दोनों ने सहस्र युग पर्यन्त घोर तप किया जिसके कारण उनकी इतनी वृद्धि हुई हैं कि उसका पार न मिलने से उनका अनंत नामकरण हुआ। पश्चात् वे दोनों मैथुन करने की इच्छा से एक होकर स्थित हुए। उस समय उनके अङ्ग के रोमकूपों में कोटि-कोटि ब्रह्माण्ड उत्पन्न हुए, जो पृथक्-पृथक् स्थित होकर आधे-आधे कोटि के विस्तृत थे। देवगण! ...

**मत्तो वेदान्भवान्प्राप्य करिष्यति मखं शुभम् । यज्ञाद्देवा भविष्यन्ति त्रिधाभूता गुणत्रयात् ॥१८६**
**सिद्धा विद्याधराश्चैव चारणाः सात्त्विकास्त्रिधा । गन्धर्वयक्षरक्षांसि राजसा गिरिसंस्थिताः॥१८७**
**पिशाचगुह्यका भूतास्तामसा गामिनो ह्यधः । तथा स्वधामया यज्ञास्त्रिधा पितृगणा विधे ॥१८८**
**भविष्यन्ति सुरै रम्या विमानसदृशाश्च खे । खेचरा गौरवर्णाश्च श्यामास्ते सात्त्विकाः स्मृताः॥१८९**
**गिरिद्वीपमया रम्याः सरोरूपाश्च राजसाः । भूचरास्ते भविष्यन्ति त्रिधा पितृगणा विधे ॥१९०**
**बिलेतलमया ये तु नारका यातनामयाः । तामसास्ते भविष्यन्ति पितरोऽधोमहीतले ॥१९१**
**व्ययभूताश्च ते लोका वृद्धा मध्याः क्षयाः क्रमात् । इयं भूमिर्महाभागा सर्वदा च सनातनी ॥१९२**
**मेरुर्वै च नमेरुश्च द्वीपाश्चासंस्तथा न हि । इलावर्तादिखण्डाश्च सन्ति नैव क्वचित्क्वचित् ॥१९३**
**ये तु तारामया लोका विमानसदृशा विधे । स्वेच्छया च करिष्यन्ति रक्षिता यज्ञकर्मणा ॥१९४**
**यज्ञो नास्ति यदा भूमौ तदा ते भगणा विधे । विघ्नभूताश्चरिष्यन्ति नित्यवक्रातिचारिणः ।१९५**
**कर्मभूमिश्च गौर्ज्ञेया श्रुतिरूपा जगन्मयी । यस्तां पाति च भो ब्रह्मन्स गोप इति विश्रुतः ॥१९६**
**गोपशक्तिः स वै गोपो गोपानामर्चको हरिः । कोटिकोटिसहस्राश्च सर्वे गोपा हरेः कलाः ॥१९७**
**तावन्तश्चैव ब्रह्माण्डा गोपनाम्ना प्रकीर्तिताः । कर्मभूमेस्तथोर्ध्वं च रविर्योजनलक्षकः ॥१९८**

---

मुझसे वेदों की प्राप्ति करके आप लोग यज्ञानुष्ठान सुसम्पन्न करेंगे जिससे तीनों युगों के तीन भाग द्वारा देवों की उत्पत्ति होगी उस सात्त्विक गुण के तीन भागों में विभक्त होने से सिद्ध विद्याधर एवं चारण राजस् द्वारा पर्वत निवासी गन्धर्व यक्ष तथा राक्षस और अधोलोक में रहने वाले पिशाच एवं गुह्यकों की उत्पत्ति तामस गुणों द्वारा होगी । उसी प्रकार पितृगणों के लिए स्वधामय यज्ञ (पिंडदान) तीन भागों में

ततश्शशी तथामानस्ततश्चोर्ध्वं भमण्डलम् । द्विलक्षयोजनगतस्ततो भौमस्तथाविधः ॥१९९
भौमाद्बुधस्तथा ज्ञेयो बुधाच्च बृहतांपतिः । गुरोः शुक्रस्तथामानः शुक्रात्सौरिस्तथागतः ॥२००
शनेराहुस्तथा ज्ञेयो राहोः केतुस्तथोर्ध्वगः । सप्तलक्षमितंज्ञेयं केतोः सप्तर्षिमण्डलम् ॥२०१
लक्षैकादशगाः सर्वे ततश्चोर्ध्वं ध्रुवास्पदम् । लक्षयोजनगं चैव ततश्चोर्ध्वं महत्पदम् ॥२०२
लक्षयोजनगं ज्ञेयं ततश्चोर्ध्वं जनास्पदम् । लक्षयोजनगं ज्ञेयं तदूर्ध्वं तपसः स्थलम् ॥२०३
एवं च कर्मभूमेश्च तपः कोटचर्धयोजनम् । कर्मभूमेरधश्चैव पातालाः सप्त चान्तराः ॥२०४
लक्षयोजनगा ज्ञेयास्ततश्चाधोगताश्च ये । नरकाश्च क्रमाज्ज्ञेया भूमेः कोटचर्द्धयोजनाः ॥२०५
कर्मभूमेरुत्तरे च खण्डान्यष्टौ ततः परम् । लवणाब्धिस्ततो द्वीपस्ततः क्षीराब्धिरेव हि ॥
ततो द्वीपस्ततः सिन्धुस्ततो द्वीपस्ततोऽब्धिकः ॥२०६
कोटचर्द्धलक्षव्यानेन योजनेन विधे स्वयम् ॥२०७
कर्मभूमेः स वै ज्ञेयो लोकालोका महाचलः । लोकालोको दक्षिणे च पश्चिमे च स वै गिरिः ॥२०८
पूर्वे च कर्मभूमेश्च लोकालोकस्तथाविधः । एतेषां समुदायानां ब्रह्माण्डोऽयं प्रकीर्तितः ॥२०९
त्वत्तो भविष्यति विधे कल्पपर्यन्तमेव हि । ओमित्येकाक्षरं ब्रह्म ततो विष्णुस्त्रिधाभवत् ॥२१०
अद्य विष्णुः स वै कृष्ण इह विष्णुः स वै विराट् । इति विष्णुः स वै ज्ञेयः पुराणपुरुषोत्तमः ॥२११
पुराणपुरुषो ज्ञेय आदिब्रह्मा चिरायुगः । दैवे युगसहस्रे द्व्यहोरात्रं तस्य कीर्तितम् ॥२१२
विष्णोस्तु रोमकूपेषु ब्रह्माण्डाः कोटिशोऽभवन् । अद्य विष्णुरहं ब्रह्मन्विग्रहा तव भूतले ॥२१३

---

भूमि से ऊपर एक लक्ष योजन की दूरी पर सूर्य स्थित हैं, उनसे उतनी ही दूर चन्द्रमा और उनसे ऊपर उतने दूर पर नक्षत्रों का मण्डल स्थित है। उनसे दो लक्ष योजन की दूरी पर मंगल, उनसे उतनी दूर बुध, बुध से उतनी दूरी पर बृहस्पति, बृहस्पति से उतने दूर शुक्र, शुक्र से शनि, शनि से राहु और राहु से केतु

इत्युक्तवान्तर्दधे विष्णुर्ब्रह्मा सृष्टिमचीकरत् । तेन प्रोक्तं यतो भाव्यं महाकल्पो हि स स्मृतः ।।२१४
भविष्यो नाम विख्यातो द्विसहस्रभवायुषा । पूर्वार्द्धश्च कूपरार्द्धश्च पुराणपुरुषस्यहि: ।।२१५
अष्टादशसहस्राणि कल्पाः पूर्वार्द्धके गताः । परार्द्धः साम्प्रतं ज्ञेयो जातं तस्य दिनद्वयम् ।।२१६
अद्याहं कूर्मकश्चैव वाहने मत्स्यः प्रकीर्तितः ।तृतीयः श्वेतवाराहो दिवसस्तस्य कल्पवान् ।।२१७
तथा मध्याह्नकालो हि साम्प्रतं वर्तते सुराः । भविष्याख्ये महाकल्पे कथा भाविष्यकैर्जनैः ।।२१८
कथिता ब्रह्मणश्चाग्रे शतकोटिप्रविस्तरैः । दशलक्षणसंयुक्तं शतकोटिप्रविस्तरम् ।।२१९
महापुराणं कथितं पुराणं पञ्चलक्षणम् । पद्मत्रिंशत्सहस्रं च कल्पे कल्पे प्रकीर्तितम् ।।२२०
कल्पनाम्ना पुराणं च महादेवेन निर्मितम् । अष्टादशपुराणानि निर्मितानि शिवात्मना ।।२२१
द्वापरान्ते च भगवान्व्यासः सत्यवतीसुतः । तान्येव जनयामास लोकमङ्गलहेतवे ।।२२२

## व्यास उवाच

इति कल्कवचः श्रुत्वा ते देवा विस्मयान्विताः । नमस्कृत्य गमिष्यन्ति स्वं स्वं धाम प्रहर्षिताः ।।२२३

**इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये**
**कलियुगीयेतिहाससमुच्चयवर्णनं नाम पञ्चविंशोऽध्यायः ।२५**

---

विघ्न के अपहरणार्थ स्थित हूँ । इतना कर विष्णु अन्तर्हित हो गये और ब्रह्मा ने सृष्टि करना आरम्भ किया । उन्होंने ही यह बताया है कि भावीकल्प भविष्यमहाकल्प के नाम से प्रख्यात होगा, जिसकी दो सहस्र वर्ष की आयु बतायी गयी है । पुराण पुरुष के पूर्वार्द्ध भाग द्वारा उत्पन्न अठ्ठारह सहस्र कल्पव्यतीत

# अथ षड्विंशोऽध्यायः
## कलियुगीयेतिहाससमुच्चयवर्णनम्
### व्यास उवाच

तदा स भगवान्कल्किः पुराणपुरुषोद्भवः। दिव्यं वाजिनमारुह्य खड्गी वर्मी च चर्मधृक्॥
म्लेच्छांस्तान्दैत्यभूतांश्च हत्वा योगं गमिष्यति ॥१
षोडशाब्दसहस्राणि तद्योगाग्निप्रतापिता। भस्मभूता कर्मभूमिर्निर्जीवा भविता तदा॥२
ततोऽनुयोगं जनितो मेघो भूत्वा लयङ्करः। प्रलयाग्रेण सा भूमिर्जलमध्ये गमिष्यति॥३
तदा कलियुगो घोरो बलिपार्श्वं गमिष्यति। गते कलियुगे घोरे कर्मभूमिं पुनर्हरिः॥
कृत्वा स्थलमयीं रम्यां यज्ञैर्देवान्यजिष्यति ॥४
यज्ञभागमुपादाय देवास्ते बलसंयुताः। वैवस्वतं मनुं गत्वा कथयिष्यन्ति कारणम्॥५
कल्किनो वदनाज्जातो ब्राह्मणो वर्ण एव हि। बाह्वोः क्षत्रं विशो जान्वोः शूद्रो वर्णस्तदङ्घ्रयोः॥६
गौरो रक्तस्तथा पीतः श्यामस्ते ब्राह्मणादयः। देव्याः शक्तिं समादाय जनिष्यन्ति सुतान्बहून्॥७
एकविंशत्किष्कुमिता मनुजा धर्मरूपिणः। जातिधर्ममुपादाय यजिष्यंति सुरान्मुदा॥८
तदा वैवस्वतो धीमान्नत्वा तं कल्किनं हरिम्। अयोध्यायां राजपदं करिष्यति तदाज्ञया॥९

---

# अध्याय २६
## कलियुगीयेतिहाससमुच्चय वर्णन

**व्यास जी बोले**—पुराण पुरुष द्वारा उत्पन्न कल्कि देव दिव्यअश्व पर सुशोभित होकर खड्ग, चर्म

तच्छिक्षातो भवेत्पुत्रो यः स इक्ष्वाकुरेव हि । पितू राज्यं पुरस्कृत्य भूमौ दिव्यं शतं समाः ॥
दिव्यवर्षशतायुश्च त्यक्त्वा देहं गमिष्यति ॥१०
यदा तु भगवान्कल्की ब्रह्मसूत्रं करिष्यति । तदा वेदाश्च चत्वारो मूर्तिमन्तश्च साङ्गकाः ॥
अष्टादशपुराणैश्च तत्रायास्यन्ति हर्षिताः ॥११
स्तोष्यन्ति कल्किनं देवं पुराणपुरुषांशकम् । कार्त्तिके शुक्लपक्षे च नवम्यां गुरुवासरे ॥१२
यज्ञकुण्डाच्च पुरुषो भविष्यति महोत्तमः । नाम्ना सत्ययुगो ज्ञेयः सत्य मार्गप्रदर्शकः ॥१३
दृष्ट्वा तं पुरुषं रम्यं तदा ब्रह्मादयः सुराः । तां तिथिं वर्णयिष्यन्ति कर्मक्षयकरीं मनोः ॥१४
अस्यां तिथौ च मनुजो धातृवृक्षतटे मुदा । योऽर्चयिष्यति यान्देवान्देवास्ते तस्य वश्यगाः ॥१५
अक्षया नवमी नाम युगादिनवमी हि सा । लोकमङ्गलदात्री च सर्वकिल्बिषनाशिनी ॥१६
धातृमूलतले चैव मालतीं तुलसीं मुदा । संस्थाप्य वेदविधिना शालग्रामं यजन्ति ये ॥
जीवन्मुक्ताश्च ते ज्ञेया पितॄणां तृप्तिकारकाः ॥१७
धातृवृक्षतले गत्वा यो वै श्राद्धं करिष्यति । गयाश्राद्धसहस्रस्य लप्स्यते च फलं परम् ॥१८
यः करोति तथा होमं सहस्रमखसन्निभम् । मृतः सस्वर्गमाप्नोति सकुलः सपरिच्छदः ॥१९
इत्युक्ते वचने तेषां कल्की देवो मुदान्वितः । तथास्त्वित्येव वचनं वदिष्यति सुरान्प्रति ॥२०
इत्युक्त्वा भगवान्कल्की पश्यतां देवरूपिणाम् । तत्रैवान्तर्गतो भूत्वा सुषुप्तश्च भविष्यति ॥२१
गते तस्मिन्भगवति कर्मभूमिः सुदुःखिता । विरहाग्निमती भूत्वा बीजांस्तान्संक्षयिष्यति ॥२२

---

दीक्षा द्वारा जो पुत्र उत्पन्न होगा, उसका इक्ष्वाकु नाम होगा जो पृथ्वी पर अपने पिता के राज्य-भार का वहन करते हुए दिव्य सौ वर्ष का सुखमय जीवन व्यतीत करेंगे और उसके पश्चात् आयु की समाप्ति में देह का परित्याग करेंगें । भगवान कल्कि जिस समय ब्रहासत्र नामक यज्ञ का अनुष्ठान आरम्भ करेंगे उस समय

तस्मिन्काले महादैत्याः पातालतलवासिनः । प्रह्लादं च पुरस्कृत्य गमिष्यन्ति सुरान्प्रति ।।२३
खरोष्ट्रगृद्ध्रमहिषकाककर्कसमास्थिताः । सिंहव्याघ्रवृकारूढाः शृगालश्येनवाहनः ।।२४
प्रासपट्टिशखड्गाण्श्च भुशुण्डीपरिघादिकान् । गृहीत्वा वेगवन्तस्ते गर्जिष्यन्ति पुनः पुनः ।।२५
तदा शक्रादयो देवास्त्रयस्त्रिशद्गणा मुदा । स्वायुधानि गृहीत्वाशु करिष्यन्ति रणं महत् ।।२६
दिव्यवर्षमयं घोरं युद्धं तेषां भविष्यति । मृतान्मृतान्रणे दैत्यान्भार्गवो जीवयिष्यति ।।२७
श्रमभूतास्तथा देवास्त्यक्त्वा युद्धं समन्ततः । क्षीराब्धिं च गमिष्यन्ति यत्र साक्षाद्हरिः स्वयम् ।।२८
तेषां स्तुत्या स भगवान्देवमङ्गलहेतवे । स्वपूर्वार्द्धं स्वरूपं च करिष्यति सनातनः ।।२९
स च हंसो हरिः साक्षाच्छतसूर्यसमप्रभः । शुक्रं प्रह्लादप्रमुखान्स्तेजसा तापयिष्यति ।।३०
तदा पराजिता दैत्यास्त्यक्त्वा गां दुःखिता भृशम् । वितले च गमिष्यन्ति महादेवेन रक्षिताः ।।३१
पुनस्ते सकला देवा निर्भया निरुपद्रवाः । वैवस्वतस्य तनयं चाभिषेक्ष्यन्ति भूपदे ।।३२
दिव्यवर्षशतायुश्च स इक्ष्वाकुर्भविष्यति । वर्षाणां च प्रमाणेन नृणामायुश्चतुश्शतम् ।।३३
इति ते कथितं सर्वं यत्पृष्टोऽहं मनो त्वया । चतुर्युगानां चरितं नृपाणां च पृथक् पृथक् ।।३४
चतुष्पादा हि धर्मस्य ज्ञानं ध्यानं शमो दमः । आत्मज्ञानं स वै ज्ञानं ध्यानमध्यात्मचिन्तनम् ।।
मनः स्थिरत्वं च शमो दमस्त्विन्द्रियनिग्रहः ।।३५
चतुर्लक्षाब्दकान्येव द्वात्रिंशच्च सहस्रकम् । तत्सङ्ख्यया हि धर्मस्य पादश्चैकः प्रकीर्तितः ।।३६

---

वियोगाग्नि से संतप्त होने पर बीजों को विनष्ट करेगी । उसी बीच पाताल निवासी महादैत्य- गण प्रह्लाद को आगेकर देवों से युद्ध करने के निमित्त अपने गधे, ऊँट, गीद। महिष, कौवे, केकहरा, सिंह, बाघ, भेडिया स्यार, बाज पक्षी आदि वाहनों पर बैठकर प्रास, पट्टिश, खड्ग, भुशुण्डि एवं परिघ आदि अस्त्रों से सुसज्जित होकर अत्यन्त वेग से वहाँ पहुँचकर बार-बार गर्जन करेंगे । उसे सुनकर इन्द्रादि देवगण

**प्राह्णमध्याह्नसायाह्नं त्रिसन्ध्यं च भवेत्सदा । एकैकेन पदा तस्य विराजो भुवि वर्तते ।।३७**
**यदा धर्मो भवेद्वृद्धस्तदायुश्चैव वर्द्धते । सप्तश्लोकसहस्राणि खण्डेऽस्मिन्कथितानि हि ।।**
**अतश्चोत्तरखण्डं हि वर्णयामि मनो शृणु ।।३८**

**इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चयवर्णनं नाम षड्विंशोऽध्यायः ।२६**

**इति श्रीभविष्ये महापुराणे तृतीयं प्रतिसर्गपर्वचतुर्युगखण्डापरपर्यायं समाप्तम् ।।३।।**

---

का एक चरण होता है, जिसमें पूर्वार्द्ध मध्याह्न सायाह्न रूपी तीन संध्याएँ होती हैं । इस भाँति भूतल पर एक चरण से वह सदैव वर्तमान रहता है । जिस समय धर्म की वृद्धि होती है उस समय प्राणियों की आयु भी बढ़ जाती है । मनु ! इस खण्ड में मैंने सात सहस्र श्लोकों का वर्णन तुम्हें सुना दिया । अब इसके उपरांत उत्तरखण्ड का वर्णन कर रहा हूँ, सावधान होकर सुनो ।२०-३८

श्री भविष्यमहापुराण के प्रतिसर्गपर्व में कलियुगीय इतिहाससमुच्चय वर्णन नामक छब्बीसवाँ अध्याय समाप्त ।२६।

**प्रकाशक :**

प्रभात मिश्र शास्त्री

प्रधानमन्त्री

हिन्दी साहित्य सम्मेलन, प्रयाग

१२, सम्मेलन मार्ग, इलाहाबाद - ३

**प्रकाशन वर्ष** : शक १९१८ : सन् १९९७

**संस्करण** : प्रथम

**स्वत्वाधिकार** : **हिन्दी साहित्य सम्मेलन**

**मूल्य** : तीन सौ पच्चीस रुपये मात्र

**मुद्रक एवं फोटो कम्पोजिंग** : **मनोज आफसेट**
२५५, चक, जीरोरोड, इलाहाबाद

**आवरण-सज्जा** : कृष्णकुमार मित्तल

# भविष्यमहापुराणम्

## ( द्वितीय खण्ड )

## मध्यम एवं प्रतिसर्गपर्व

( हिन्दी-अनुवाद सहित )

**अनुवादक :**

पण्डित बाबूराम उपाध्याय